# rAmakarNarasAyanam

# રામકર્ણરસાયનમ્

## Document Information

Text title : rAmakarNarasAyanam

File name : rAmakarNarasAyanam.itx

Category : raama

Location : doc_raama

Author : rAmabhadradIkShita

Proofread by : PSA Easwaran

Description-comments : Vishnustutimanjari volume 2 print pages 311-399 niShyandaH 1-2

Latest update : May 28, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2022

*sanskritdocuments.org*

# રામકર્ણરસાયનમ્

શ્રીરામભદ્રદીક્ષિતકૃતમ્ ।

પ્રથમો નિષ્યન્દઃ ।

દિશતુ સ કુશલં જિતે દશાસ્યે
વિધિવિહિતસ્તુતિવેદિતસ્વરૂપઃ ।
ઉપદિશતિ શિવો નૃણાં યદીયં
મનુમવિમુક્તપુરે વિમુક્તિહેતોઃ ॥ ૧॥

વિહિતવિધિમપાસ્યતા નિષિદ્ધા-
ન્યપિ ચરતાપ્યકૃતાક્ષનિગ્રહેણ ।
યદઘમુપચિતં મયા યતિષ્યે
રઘુવરસંસ્મરણેન તન્નિમાર્ષ્ટુમ્ ॥ ૨॥

ચિરપરિચિતયા મનો વિકૃષ્ટં
દિશિ દિશિ વાસનયા ચ મે નિયામ્યમ્ ।
ઇતિ કવનપથેઽવતાર્ય રામ -
સ્મરણવિધાવનઘે કરોમ્યુપાયમ્ ॥ ૩॥

પ્રકૃતિરિતિ સરસ્વતીતિ લક્ષ્મી-
રિતિ ગિરિજેતિ જગન્મયીતિ વા યામ્ ।
ગદતિ મુનિગણઃ કવિત્વસિદ્ધ્યૈ
કથમપિ તાં કલયે વિદેહકન્યામ્ ॥ ૪॥

મધુરભણિતયે પતિવ્રતાનાં
મકુટમણિં કલયે મહીકુમારીમ્ ।
પતિકૃતરિપુપાતનપ્રતિજ્ઞા-
દલનભયાદહિતેઽપ્યદત્તશાપામ્ ॥ ૫॥

હૃદય વિષયમેવ સેવસે કિં

યદયમુદગ્રવિષોપમઃ ક્રમેણ ।
મદયતિ ચ નિહન્તિ ચ પ્રકામં
તદયનમેત્ય ગિરાં ભજસ્વ રામમ્ ॥ ૬॥

રઘુવરચરણારવિન્દભક્તિ-
ચ્છલમકરન્દનિરન્તરાભિષિક્તાઃ ।
વકુલપરિમલા ગિરો મદીયાઃ
કવિકુલકર્પરસાયનાનિ સન્તુ ॥ ૭॥

ભરતવિદિતપાદુકાપ્રભાવં
ધરણિસુતાદરણીયનામધેયમ્ ।
કરતલધૃતકાર્મુકં પુમાંસં
મરકતનીલશરીરમાશ્રયામઃ ॥ ૮॥

નિટિલનયનનિર્વૃતિપ્રદાખ્યં
કુટિલનિશાચરકુમ્ભિનાં મૃગેન્દ્રમ્ ।
કટિલસદસિમમ્બુદાભમેકં
જ્જન્તિલપુરીકૃતચાપબાણમીડે ॥ ૯॥

નિલયમખિલમઙ્ગલસ્ય રક્ષો-
વલયવસપ્રબલાયિતાનલાસ્ત્રમ્ ।
કલયતિ હૃદયં વિદેહકન્યા-
વલયપદાઙ્કિતકન્ધરં પુમાંસમ્ ॥ ૧૦॥

વિમોહયતિ વિષ્ટપત્રયજનાન્ગુણારોપણ-
ક્ષપાત્રુટિતચણ્ડિકારમણચાપચણ્ડધ્વનૌ ।
જયત્યસકૃદુન્મિષત્પુલકયોરપેતત્રપં
પરસ્પરનિરીક્ષણં રઘુવરક્ષમાકન્યયોઃ ॥ ૧૧॥

કરોમિ હૃદયામ્બુજે કમપિ વીરમમ્ભોનિધેઃ
નિબન્ધનમબિન્ધનજ્વલનબન્ધુતૂણીશયમ્ ।
ન કશ્ચિદપિ દૃશ્યતે જગતિ યસ્ય શક્તો જયે
સ્મરપ્રહિતજાનકીનયનપદ્મબાણં વિના ॥ ૧૨॥

કષ દલદુત્પલદ્યુતિરુદારવેષોજ્જ્વલઃ
સ્વયં વિશતિ મે મનસ્ત્વરિતમાઃ પરિજ્ઞાયતે ।
સ એષ નનુ જાનકીકુચતટીપટીરદ્રવ-

પ્રસક્તઘનવાસનાઘુમુઙ્ઘુમાયમાનઃ પ્રભુઃ ॥ ૧૩॥

ભજે શરધનુર્ધરં વિકટચિત્રકૂટાટવી-
ચરં કમપિ શઙ્કરપ્રણયિનીપ્રિયાખ્યં પ્રભુમ્ ।
સ્ફુટાકલિતકુઙ્કુમા વદતિ યસ્ય વક્ષસ્તટી
મૃગેન્દ્રરસિતત્રસજ્જનકજાહઠાલિઙ્ગનમ્ ॥ ૧૪॥

ચિરસ્ય વિધુરસ્ય મે વિષયઘર્મઘોરાતપૈઃ
પયોદનિચયોદયપ્રતિનિધિઃ કિલેયં દશા ।
નરાઘમુષિ રાઘવે યદધુના મનઃ પ્રીયતે
સમસ્તસુરમસ્તકપ્રણતિકર્મણિ બ્રહ્મણિ ॥ ૧૫॥

કટીઘટિતવલ્કલં ઘનલસજ્જટામણ્ડલં
કરાત્તશરકાર્મુકં કમલપત્રમિત્રેક્ષણમ્ ।
તમાલદલમેચકં ધરણિકન્યકાકામુકં
તરઙ્ગિતકૃપારસં તરણિવંશદીપં ભજે ॥ ૧૬॥

અચોદિતકુલક્રમં પુનરપૃષ્ટજાતિક્રિયં
નયાનયવિચારણાવિધુરમસ્તશઙ્કાકણમ્ ।
ઉપેયુષિ વિભીષણે ઝટિતિ દત્તમસ્યાભયં
મયેતિ સમુદીરિતા ભગવતો ગિરઃ પાન્તુ નઃ ॥ ૧૭॥

કહ્લારામ્બુજગન્ધિમન્દપવને ખેલન્મૃગાલઙ્કૃતે
કૂજત્કોકિલબાલચૂતગહને કૂલે સરય્વાઃ શુભે ।
પશ્યાન્વેતિ શુકં શુકીતિ ચુબુકે ગૃહ્ણન્કરેણ પ્રિયાં
ચિત્તે ભાતિ સ કોઽપિ મે દશશિરોમત્તેભકણ્ઠીરવઃ ॥ ૧૮॥

માદ્યત્કેકિનિ ચિત્રકૂટકટકે મન્દાકિનીમેદુરે
પ્રત્યગ્રપ્રસવસ્ય કેસરતરોઃ પ્રચ્છાયશીતે તલે ।
કૌશેયાસ્તરણે વિદેહદુહિતુઃ કુર્વાણમઙ્કે શિરો
નીલામ્ભોદનિભં ભજે રઘુકુલપ્રાચીનભાગ્યં પ્રભુમ્ ॥ ૧૯॥

ત્રસ્તપ્રસ્થિતહંસયૂથમભિતોનૃત્યન્મયૂરવ્રજં
વલ્મીકાન્તરસમ્પ્રવિષ્ટભુજગં પઙ્ક્તીભવચ્ચાતકમ્ ।
પુષ્યન્નીપસિલિન્ધ્રકેતકિજનસ્થાનાટવીમેયુષા
કાલિમ્ના મમ કેનચિત્કવચિતં ચેતો વિરાધદ્વિષા ॥ ૨૦॥

સંરમ્ભસ્ખલિતોત્તરીયમવનિન્યસ્તાગ્રપાદં ભુજા-
બુધ્યમ્ય શ્વથનીવિ પુષ્પનિચયં સગલતીં જાનકીમ્ ।
પશ્યન્પશ્વવટીવને મુહુરપિ પ્રચ્છન્ન એવાન્તિકે
હસ્તોપાત્તધનુઃશરઃ સ્ફુરતુ મે ચિત્તે રઘુગ્રામણીઃ ॥ ૨૧॥

નિર્વૃત્તે ખરદૂષણત્રિશિરસામુન્મૂલનાદાહવે
વૈદેહી પરિષસ્વજે સપદિ યં મૂર્તા જયશ્રીરિવ ।
ઉન્મીલત્પુલકશ્રમામ્ભસિ ધનુર્ન્યસ્તૈકહસ્તામ્બુજે
તસ્મિન્સસ્મિતવક્ત્રચન્દ્રમસિ મે દેવે મનો ધાવતિ ॥ ૨૨॥

પાયાત્પર્ણકુટીગતો ઘનઘટાસિક્તાવનીસૌરભ-
ઘ્રાણવ્યાપૃતપુષ્કરદ્વિપકુલે નીપપ્રસૂનાકુલે ।
કેકાકણ્ઠશિખણ્ડિતાણ્ડવયુતે ખેલત્પુરોમારુતે
નન્દન્પ્રાવૃષિ ચિત્રકૂટકટકે સીતાસખો રાઘવઃ ॥ ૨૩॥

અર્ધાવર્તિતમન્ત્રમર્ધવિરતસ્વાધ્યાયમર્ધોજ્ઝિત-
બ્રહ્મોપાસનમર્ધમુક્તહવનાતિથ્યાદિસર્વક્રિયમ્ ।
દૃષ્ટ્વા પઞ્ચવટીજુષો યમૃષયઃ સાર્થં તપો મેનિરે
કન્દર્પાયુતસુન્દરં વ્રજતિ મે કાકુત્સ્થમેનં મનઃ ॥ ૨૪॥

ચારુસ્મેરમુખામ્બુજં ચરણયોર્મઞ્જુક્વણન્નૂપુરં
ચઞ્ચદ્રત્નલલન્તિકાલિકલસત્કસ્તૂરિકાચિત્રકમ્ ।
કાન્તવ્યાઘ્રનખાનુબન્ધિકનકગ્રૈવેયકાલઙ્કૃતં
કૌસલ્યાઙ્કવિભૂષણં કુવલયશ્યામં ભજામઃ શિશુમ્ ॥ ૨૫॥

દત્ત્વા પાર્શ્વજુષો વિદેહદુહિતુશ્ચાપં કરામ્ભોરુહે
ગુલ્ફદ્વન્દ્વનિવેશિતસ્ફિગવનૌ કુર્વન્સમે જાનુની ।
દૃષ્ટ્યા કૂણિતયા કરામ્બુજયુગવ્યાસક્તમૂલાઞ્ચલં
પશ્યન્બાણમૃજુર્ન વેતિ હૃદિ મે વીરોઽયમારોહતિ ॥ ૨૬॥

ઉન્મીલન્નવમલ્લિકાપરિમલોદઞ્ચદ્દ્વિરેફારવૈ-
રારણ્યે તુલસીવને મુખરિતે દૃશ્યે શુકશ્યામલે ।
શશ્વલ્લીનમયૂરદૃગ્વલનયા શશ્વદ્ગૃહીતં બલા-
જ્જાનક્યા સહ ચિત્રકૂટકટકે દેવં મનો ધાવતિ ॥ ૨૭॥

સીતાદત્તકરામ્બુજં પદયુગશ્લિષ્યન્મણીપાદુકં
હર્ષાવેક્ષિવિહારબર્હ્યુપસૃતાભ્યર્ણં ઘટોઘ્ન્યા ગવા ।

સ્વામિન્દેવ જયેતિ પઞ્જરશુકસ્વાનોલ્લસત્તોરણં
સાકેતાધિપતેરુષસ્યવતુ નઃ શય્યાગૃહાન્નિર્ગમઃ ॥ ૨૮॥

પાણૌ મુષ્ટિગૃહીતપન્નગલતાપર્ણોચ્ચયે બિભ્રતીં
વામે રત્નકરણ્ડકં તદપરે વીટીં વિદેહાત્મજામ્ ।
પશ્યન્કૂજતિ પાર્શ્વતઃ કલરવે દૃષ્ટ્યા તિરશ્ચીનયા
મન્દસ્મેરમુખીં હૃદિ સ્ફુરતિ મે મઞ્ચાધિરૂઢો વિભુઃ ॥ ૨૯॥

શૈલાન્મત્તોઽવતરતિ કરી જ્યાસ્વનૈર્વારયૈનં
સૌમિત્રે મા ભવતુ ચકિતા જાનકીતિ પ્રહિણ્વન્ ।
તજ્જ્વાઘોષં મૃગપતિરવં વ્યાહરન્વેપિતાઙ્ગ્યા
ગાઢાશ્લિષ્ટો જનકસુતયા કૌસલેયોઽવતાન્નઃ ॥ ૩૦॥

હંસી મન્દં ચલતિ હરિણી વીક્ષતે લોલલોલં
રમ્યં કૂજત્યયમિહ પિકો રાજતે બર્હિણોઽસૌ ।
ઇત્યાશ્ચર્યાદ્વનભુવિ વધૂં દર્શયન્તીં યદિ ત્વાં
પશ્યામ્યેતૈરલમિતિ વદન્પાતુ ન વૈ કૌસલેયઃ ॥ ૩૧॥

દેવ ત્વાં રઘુવીર નીરદનિભં સીતાતડિત્સઙ્ગતં
કારુણ્યામૃતવર્ષિણં કતિપયે દૃષ્ટ્વા મયૂરા ઇવ ।
કિં નૃત્યન્તિ ન ચાતકા ઇવ પરે કિં વા ન ગાયન્ત્યતઃ
સ્વામિન્પાલય પાલયેત્યહમપિ ક્રોશામિ મણ્ડૂકવત્ ॥ ૩૨॥

ખેલત્કેકિનિ સઞ્ચરન્મૃગશિશૌ ચૂતસ્ફુરદ્વલ્કલે
નીપન્યસ્તનિષઙ્ગધન્વનિ જનસ્થાનોટજપ્રાઙ્ગણે ।
સીતાં પુષ્પસમિત્કુશાન્હૃતવતીં સમ્ભાવયન્તં દૃશા
બદ્ધસ્વસ્તિકમેણચર્મણિ ઘનચ્છાયં ભજેયં પ્રભુમ્ ॥ ૩૩॥

સમ્પ્રાપ્તો મૃગયાં વિધાય નલિનીપત્રાહૃતૈરમ્બુભિઃ
સઙ્ક્ષાલ્યાંશુકપલ્લવેન કુચયોઃ પાદાબ્જમુન્માર્જતીમ્ ।
મૃષ્ટા નેહ મનઃ શિલેતિ વિસૃતાં રત્નાઙ્ગુલીયશ્રિયં
વૈદેહીં પ્રતિ દર્શયન્હૃદિ કૃતવ્યાજો વિભુઃ પાતુ નઃ ॥ ૩૪॥

શ્લથકચભરાન્નૈતદ્ભૂમૌ નિપાતય સુન્દરી-
ત્યુદિતહસિતં સવ્રીડાયા મહીદુહિતુર્દિશન્ ।
વનતરુતલે મલ્લીપુષ્પૈઃ કૃતં નવગર્ભકં
દિનકરકુલોત્તંસો દેવોઽધિરોહતિ મે મનઃ ॥ ૩૫॥

દલિતદનુજાટોપે ચાપાધિરોપિતસાયકે
મરકતમણિચ્છાયાદાયાદકાયમનોહરે ( હોભરે)।
પ્રપાતજનતાપ્રાણત્રાણપ્રવીણપરાક્રમે
સ્ફુરતિ પુરતોઽસ્માકં સીતાપતૌ દુરિતં કુતઃ ॥ ૩૬॥

અવિદિતનતક્લેશાનીશાનપાસ્ય દિશામહો
સહ પરિહરન્કાલીકેલીસખં મુરલીભૃતા ।
વનમૃગપરીવારે વીરે વરેષુધનુર્ધરે
કુવલયદલશ્યામે રામે કુતૂહલિ મે મનઃ ॥ ૩૭॥

સ્ફટિકધવલાન્મેઘશ્યામે ગૃહીતમૃગાનલા-
દ્ધૃતધનુરિષૌ ભૂતેશાનાત્પ્લવઙ્ગમસેવિતે ।
મતિરવતરત્યાત્તવ્યાઘ્રાજિનાદ્ધૃતવલ્કલે
શિખરિતનયાનાથાત્પૃથ્વીસુતાપરિણેતરિ ॥ ૩૮॥

સ્વચ્છન્દં વ્રજસુન્દરીજનવિટાદ્બદ્ધૈકદારવ્રતે
લીલાવેણુલસત્કરાત્ત્રિભુવનત્રાણાય ચાપસ્પૃશિ ।
ચૌર્યાકૃષ્ટવધૂજનાત્પરિણતૌ કીટાદિમુક્તિપ્રદે
વ્યાવૃત્તં મમ યાદવાદ્રઘુપતૌ ચેતઃ સ્વયં ધાવતિ ॥ ૩૯॥

કશ્ચિદ્બાલો મૃત્તિકાં ભક્ષયિત્વા કશ્ચિદ્વૃદ્ધશ્ચૂતમૂલે લુઠિત્વા ।
માં રક્ષેચ્ચેન્માસ્તુ તદ્યન્મમાસ્તે ત્રાતા સીતાકેલિલોલો યુવૈકઃ ॥ ૪૦॥

અભિમતફલસિદ્ધ્યૈ ધ્યાતુમેકં સુરાણા-
મનુસરતિ મનો મે યાવદાબદ્ધવેગમ્ ।
અપહરતિ નિરુન્ધન્નન્તરા તાવદેત-
ત્કપિકુલપરિવારઃ કશ્ચિદમ્ભોદનીલઃ ॥ ૪૧॥

ક્ષણચલિતનિરૂઢસ્વર્ણદીકર્ણભૂષે
પરિહૃતમયકન્યાપત્રલેખાપ્રસઙ્ગે ।
વિરચિતસુરસુભ્રૂવિભ્રમપ્રાતિભાવ્યે
કુતુકિતમતિભવ્યે ક્વાપિ કાલિમ્નિચેતઃ ॥ ૪૨॥

કચભરનિટિલભ્રૂકર્ણદૃઙ્નાસિકોષ્ઠ-
સ્તનજઘનનિતમ્બં પશ્યદન્યાઙ્ગનાનામ્ ।
મલિનયતિ મનશ્ચેન્મન્મથસ્તાવતાલ કિં

વિમલયિતુમહલ્યાપાવનોઽપ્યસ્તિ વીરઃ ॥ ૪૩॥

નવકુલવલયદામશ્યામલઃ કોમલાઙ્ગ્યા
વિરચિતમધુરશ્રીરેકયા વિદ્યુતેવ ।
જલધર ઇવ કાલે જૃમ્ભમાણો મયૂરં
કુતુકયતિ મનો મે કોઽપિ કોદણ્ડભૂષઃ ॥ ૪૪॥

મનસિ મમ સમિન્દ્ધે પુણ્યભાજામવેક્ષ્યઃ
કપિસદસિ મુનીનાં ચેતસાસ્વાદનીયઃ ।
જનકનૃપતિકન્યાસસ્પૃહાલિઙ્ગનાર્હઃ
શ્રુતિયુવતિકબર્યાઃ કોઽપિ સૌરભ્યસારઃ ॥ ૪૫॥

કુવલયદલનીલઃ કોઽપિ રક્ષોવધૂનાં
કુચગિરિષુ નિપાતં બાષ્પવૃષ્ટેર્વિધાતા ।
નિખિલભુવનચેતોબર્હિનૃત્તૈકહેતુઃ
શમયતિ મમ તાપં શાર્ઙ્ગચાપામ્બુવાહઃ ॥ ૪૬॥

નિગમશિખરિશ઼ૃઙ્ગાન્નિત્યમાગત્ય ખેલન્
મુનિજનહૃદરણ્યે મોહસારત્વમુક્તે ।
દશવદનગજેન્દ્રે દર્શિતાઘાતલીલો
વશયતિ રઘુસિંહો માનસં નઃ પ્રસન્નઃ ॥ ૪૭॥

કરયોઃ શરકાર્મુકાભિરામં પદયોરશ્મવિવેકકૃત્પરાગમ્ ।
કલિતેષુધિમંસયોઃ પ્રભું તં કરુણાપૂર્ણમપાઙ્ગયોરુપાસે ॥ ૪૮॥

અવલમ્બ્ય શરાસમદ્રિસારં ગુણમાકૃષ્ય ગુરુધ્વનિં વિમુઞ્ચન્ ।
વિશિખાનહિતેષુ રુક્મપુઙ્ખાન્વિહરત્યાહવસીમ્નિ વીરરામઃ ॥ ૪૯॥

ચરમાઙ્ગનિબદ્ધચારુતૂણં સુરમાઙ્ગલ્યધુરીણચાપબાણમ્ ।
અલિનીલમુપૈતિ માનસં મે નલિનીનાયકવંશભાગધયેમ્ ॥ ૫૦॥

દૃશિ કારુણિકઃ કરે ધનુષ્માન્કુશિકાપત્યમખસ્ય રક્ષિતા યઃ ।
રજનીચરતૂલચણ્ડવાતો ભજનીયો મમ સોઽયમેક એવ ॥ ૫૧॥

વદને શબરીફલાભિલાષં વચને સત્યધુરાવિરાજમાનમ્ ।
નયનેઽપ્યનવેક્ષિતાન્યદારં ચરણે જીવલમાશ્રયે નૃપાલમ્ ॥ ૫૨॥

નવનીરદનીલમાત્તચાપં ભવનીહારરવિં શ઼ૃણોતુ લોકઃ ।
અવનીતનયાસખં જગત્યાં સ્તવનીયં મમ દૈવમેકમેવ ॥ ૫૩॥

ભરિતા દયયા દૃશોઃ  સુરાણાં પરિતાપક્ષતયે ગૃહીતચાપા ।
દુરિતાનિ ધુનોતુ કાપિ લીલા ચ્છુરિતા ભૂમિસુતાકુચાઙ્ગરાગૈઃ ॥ ૫૪॥

સુરચારણસિદ્ધબદ્ધસેવઃ શરચાપાભરણો નવામ્બુદશ્રીઃ ।
અહિમાંશુકુલાર્ણવેન્દુરેકો મહિમાઽન્તઃકરણે મમાવિરસ્તુ ॥ ૫૫॥

ધનુષા સહ સાયકં દધાને જનુષા ભૂષિતચણ્ડરશ્મિમવંશે ।
કુચનમ્રમહીસુતાનુરક્તે ક્વચન ન્યસ્તમિદં મહિમ્નિ ચેતઃ ॥ ૫૬॥

ભયકમ્પિતસાગરપ્રશસ્તે મયકન્યાતનુમણ્ડનાસહિષ્ણૌ ।
નવગારુડરત્નભાસુરે સ્યાદવગાઢં હૃદયં ક્વચિત્પ્રભૌ મે ॥ ૫૭॥

નિજનામરસજ્ઞનીલકણ્ઠં ભજનાય પ્લવગાવૃતોપકણ્ઠમ્ ।
બલયન્ત્રિતસિન્ધુમન્તરેકં કલયન્નન્યમુપાસિતું ત્વરે કમ્ ॥ ૫૮॥

વિકટભ્રુકુટિર્વિલોકતેઽરીન્વિશિખાન્સુઞ્ચતિ વિગ્રહાન્વિભિન્તે ।
અનુલિમ્પતિ શોણિતૈર્ધરિત્રીં રણરઙ્ગે રઘુપુઙ્ગવઃ સમિન્ધે ॥ ૫૯॥

સ્મયમાનમુખેન્દુરિન્દ્રનીલદ્યુતિરમ્ભોજદલેક્ષણો ધનુષ્માન્ ।
તરલીકૃતજાનકીદૃગન્તસ્તરુણઃ કશ્ચન મે મનો ધિનોતિ ॥ ૬૦॥

દલદુત્પલદામકોમલાઙ્ગી દશકણ્ઠાયુરપાયકાલભઙ્ગી ।
મનસે મમ રોચતેઽભિરૂપા કરુણા કાચિદુપાત્તબાણચાપા ॥ ૬૧॥

મૌલૌ નિધેહિ મકુટં ત્યજ બર્હિબર્હં
બાણં ગૃહાણ ધનુષા સહ મુઞ્ચ વેણુમ્ ।
શાખામૃગૈર્વિહર સન્ત્યજ ગોપબાલાન્
રામો યદૂદ્વહ ભવ ત્વમથાશ્રયે ત્વામ્ ॥ ૬૨॥

કૃષ્ણૈકસૂતરથકેતનભૂતદૂતઃ
સોઽનૂરુસારથિરથાત્મજમિત્રભૂતઃ ।
વાણીશયન્તૃકરથસ્ય શરાસભઙ્ક્તા
કશ્ચિન્મનો હરતિ કાર્મુકભૂષણો મે ॥ ૬૩॥

દૃપ્યદ્દશાનનકલત્રકઠોરગર્ભ-
વિભ્રંશવિભ્રમપરિસ્ફુટસાહસેન ।
ઘણ્ટા વિલુણ્ઠયતુ નઃ કલુષં રવેણ
કોદણ્ડકોટિઘટિતા કુલદેવતાયાઃ ॥ ૬૪॥

દેવદ્વિષાં વિજયિ દેહભૃતાં શરણ્યં
કારુણ્યભૂષિતકટાક્ષમુદગ્રચાપમ્ ।
ટઙ્કત્રુટન્મરકતોપલરત્નનીલં
ધામ સ્મરામિ ધરણીતનયાસહાયમ્ ॥ ૬૫॥

આસ્તે કૃતાન્ત ઇતિ પાપિષુ દણ્ડકારી-
ત્યાકર્ણિતેઽપિ મુહુરાપ્તપરમ્પરાયાઃ ।
રક્ષિષ્યતીતિ રઘુનન્દનમેવ સાક્ષા-
દ્વિશ્વસ્ય કેવલમહં ન વિચિન્તયામિ ॥ ૬૬॥

તિષ્ઠન્તુ દારુણતરા નિરયાઃ સહસ્રં
તિષ્ઠન્તુ ઘોરચરિતા યમકિઙ્કરા વા ।
પાપાત્મનોઽપિ નિયતં પરિપાલનાય
કોદણ્ડપાણિરિતિ કોઽપિ મમાસ્તિ નાથઃ ॥ ૬૭॥

લીલોપાત્તબલિપ્રસૂનમુકુલાઃ સ્નિગ્ધેન સૌમિત્રિણા
વૈદેહીકરપલ્લવાત્તકલશીધારામ્બુસંવર્ધિતાઃ ।
દૃષ્ટા વત્સલયા દૃશા રઘુપતેઃ પુત્રા ઇવ પ્રત્યહં
પ્રાયઃ પઞ્ચવટીકુટીરતરવઃ પ્રીણન્તિ મે માનસમ્ ॥ ૬૮॥

સૌવર્ણીમવસક્થિકામધિવસન્પાર્શ્વસ્થપૃથ્વીસુતા-
હસ્તામ્ભોજયુગક્રમપ્રસૃતયા જાતિસ્રજા દીર્ઘયા ।
પાણિભ્યામધિવેષ્ટયન્કચભરં મૌલ્યેકપાર્શ્વોચિતં
દેવો મે હૃદિ ભાતિ દત્તનયનો દૃશ્યે તદેકસ્તને ॥ ૬૯॥

ચાપસંહિતશરં ચરમાઙ્ગે
બદ્ધતૂણમુપનીવિ કૃપાણમ્ ।
વઞ્ચનાભૃગવધાય વનાન્તે
સઞ્ચરન્તમિનમન્તરુપાસે ॥ ૭૦॥

કૌણપાધિપકદર્થિતામરીકાઙ્ક્ષિતપ્રણયિબાણકાર્મુકમ્ ।
કઞ્ચન શ્રુતિકરણ્ડમૌક્તિકં કાલિમાનમવલોકયામહે ॥ ૭૧॥

જાનકીસ્તનતટાન્તપાલિકાજાતુકુઙ્કુમવિભાગપિઞ્જરઃ ।
દૃશ્યતે હૃદિ દયાધુરન્ધરઃ કોઽપિ કોસલકુલીનકુઞ્જરઃ ॥ ૭૨॥

મામકે હૃદિ મહીકુમારિકાકામકેલિકુતુકી નૃપાત્મજઃ ।
આતનોતિ પદમસ્ત્રબન્ધુરો નૂતનોદયપયોદસુન્દરઃ ॥ ૭૩॥

ચન્દ્રશેખરશરાસનચ્છિદા ચાતુરીચણકરારવિન્દયા ।
સ્વીકૃતં મમ સુરાનુકૂલયા લીલયા હૃદયમભ્રનીલયા ॥ ૭૪॥

કૌણપાલિકદલીવિષાણિના બાણચાપપરિકર્મપાણિના ।
ચણ્ડિકારમણચાપખણ્ડને પણ્ડિતેન મમ મણ્ડિતં મનઃ ॥ ૭૫॥

કૃત્તકીર્ણકુટિલક્ષપાચરે કૃત્રિમેતરગિરામગોચરે ।
ધાવતે હિ કુલદેવતેતિ મે ચિત્તમેવમિદમુત્તમે નૃણામ્ ॥ ૭૬॥

કાલિકાનિભરુચિઃ કનીયસા કાન્તયા ચ સહ કલ્પિતાસિકા ।
કાર્મુકાશુગલસત્કરામ્બુજા કાચિદસ્તિ કરુણા ગતિર્મમ ॥ ૭૭॥

મામકે મનસિ ધાન્યમાલિનીભૂષણાસહભુજોષ્મશાલિની ।
સા ચકાસ્તિ શરચાપધારિણી ભાનુમાલિકુલભાગ્યધોરણી ॥ ૭૮॥

યાતિ તેજસિ મનઃ સનાતને દૂતભૂષિતકિરીટિકેતને ।
યામિનીચરચમૂભયઙ્કરે જાનકીનયનકેલિકિઙ્કરે ॥ ૭૯॥

ચઙ્ક્રમાનુગતગન્ધસિન્ધુરા સિન્ધુરાજકૃતસેતુબન્ધના ।
વાસના ધૃતશરાસનાશુગા મેચકા મનસિ મે ચકાસ્તિ સા ॥ ૮૦॥

વાનરક્ષપિતરાક્ષસવ્રજં દીનરક્ષણવિચક્ષણં પ્રભુમ્ ।
શ્રીમદગ્ર્યશરચાપમેતિ મે જામદગ્ન્યમદનિગ્રહં મનઃ ॥ ૮૧॥

કણ્ઠે કાલશરાસભઞ્જનચપાં કલ્યાણનાનાગુણં
કારુણ્યાભરણં ખરાન્તકરણં કઞ્જાભિરામેક્ષણમ્ ।
પાણિદ્વન્દ્વગૃહીતબાણધનુષં પાથોદનીલત્વિષં
પૌલસ્ત્યાસુમુષં ભજામિ પુરુષં પાર્શ્વે વધૂટીજુષમ્ ॥ ૮૨॥

કુવલયદલનીલશ્રીભૃતાં ભૂકુમારી-
કુચકલશવિરાજત્કુઙ્કુમૈરઙ્કિતાનામ્ ।
દશમુખભુજતેજોદર્પતૂલાનલાનાં
દશરથસુકૃતાનાં દાસભાવં ભજામઃ । ૮૩

કરધૃતશરચાપઃ કાન્તિમત્પઙ્કજાક્ષો
નિહિતશરધિરંસે નીરદસ્નિગ્ધનીલઃ ।

વનમૃગપરિવારો વન્દનીયો મુનીનાં
મદયતિ હૃદયં મે મૈથિલીપ્રાપાનાથઃ ॥ ૮૪॥

મઘવદુપલનીલે મણ્ડલીકૃત્ય ચાપં
મુહુરભિદશકણ્ઠં મુઞ્ચતીષુપ્રપઞ્ચમ્ ।
રણધરણિરજોભિર્ધૂસરે વાસરેશ-
પ્રભવકુલભવાનામુત્તમે ચિત્તમેતિ ॥ ૮૫॥

શુભગુણકલકણ્ઠસ્તોમમાકન્દશાખા
નિયમિનિવહચેતોનીલકણ્ઠાભ્રરેખા ।
દશવદનવધૂટીચક્રવાકીત્રિયામા
જનયતિ કુતુકં મે જાનકીપ્રેમભૂમા ॥ ૮૬॥

કલ્યાણમાવહતુ દાશરથેઃ કટાક્ષઃ
શાખામૃગે શતમખાદપિ સાનુકમ્પઃ ।
આભાતિ ભૂમિતનયાધરબિમ્બલોભ-
સમ્પાતસઙ્ક્રમિતલાક્ષ ઇવારુણો યઃ ॥ ૮૭॥

તારુણ્યદર્પતરલીકૃતગોપકન્યા-
દૃષ્ટિપ્રિયં તવ યદસ્તિ વપુસ્તદાસ્તામ્ ।
કાકુત્સ્થવીર કમલાનયનાભિરામં
ગાત્રં ત્વિદં તવ કરોતિ મુદં મદન્તઃ ॥ ૮૮॥

સ કશ્ચન ગિરીન્દ્રજાસખશરાસનવ્રશ્ચનો
મનો હરતિ મામકં મરકતોપલશ્યામલઃ ।
ધનુઃ શરલસત્કરો ધરણિકન્યકાપ્રેમભૂઃ
ધનઞ્જયરથધ્વજાભરણભૂતદૂતઃ પ્રભુઃ ॥ ૮૯॥

ધન્યા વયં ધરણિકન્યકયા સનાથે
નાથે સ્થિતે જગતિ નઃ પરિપાલનાય ।
યઃ શીલિતો યતિભિરાત્મનિ નિષ્કલઙ્કે
લઙ્કેશ્વરં લવિતુમાત્તમનુષ્યરૂપઃ ॥ ૯૦॥

દીનાનુકમ્પિ દિવસેશ્વરવંશરત્નં
કર્તૃવ્યપેતવચસા કથમપ્યુપેયમ્ ।
તાપિઞ્છનીલરુચિ તામરસાયતાક્ષં
ચાપોજ્જ્વલં કિમપિ વસ્તુ મમાવિરસ્તુ ॥ ૯૧॥

આબદ્ધતૂણમંસે કરકમલદ્વન્દ્વધૃતધનુર્બાણમ્ ।
પશ્યામિ હૃદયકમલે રામં દૂર્વાદલશ્યામમ્ ॥ ૯૨॥

મજ્જતિ મનો મદીયં ક્વચિદપિ દલિતેન્દ્રનીલમણિનીલે ।
મહિમનિ મહીકુમારીકુચકુડ્મલકુઙ્કુમાઙ્કિતોરસ્કે ॥ ૯૩॥

જગદઘહરપ્રશંસે જનકસુતાવલયપદવિલસદંસે ।
નિગમાન્તનલિનહંસે રમતે મમ હૃદયમિનકુલાવતંસે ॥ ૯૪॥

વિકચેન્દીવરનીલં વિદેહતનયાકુચસ્તબકલોલમ્ ।
નિગમાન્તસુધાનિલયં માધુર્યં પિબતિ મામકં હૃદયમ્ ॥ ૯૫॥

સરસઘનસારમેદુરચન્દનનિષ્યન્દશીતલાલોકમ્ ।
કમપિ દલિતમયકન્યામઙ્ગલમાલિઙ્ગતિ મનો મે ॥ ૯૬॥

ગિરિશધનુસ્તરુકરિણં દલિતભૃગુપ્રવરગર્વસર્વસ્વમ્ ।
કલયામિ કમપિ વીરં કૃત્તકબન્ધં કૃતામ્બુનિધિબન્ધમ્ ॥ ૯૭॥

કુશિકસુતકુતુકદાયી કુવલયદલનીલકોમલશરીરઃ ।
કોસલકુલતિલકો મે કોઽપિ ગતિઃ કોવિદારરથકેતુઃ ॥ ૯૮॥

કુવલયદામસરૂપં કુણ્ઠિતદશકણ્ઠનિરુપમાટોપમ્ ।
કરતલગૃહીતચાપં કલયે તદ્ધામ પામરદુરાપમ્ ॥ ૯૯॥

દલિતેન્દીવરરૂપે દર્શિતદશકણ્ઠયૌવતવિલાપે ।
ધૂતશરચાપકલાપે દીવ્યતિ હૃદયં દિલીપકુલદીપે ॥ ૧૦૦॥

નિગમાન્તવનકુરઙ્ગે નિર્મલમુન્યન્તરઙ્ગનટરઙ્ગે ।
રુચિતુલિતરવિતુરઙ્ગે ક્વચન રમે રઘુકુલાર્ણવતરઙ્ગે ॥ ૧૦૧॥

દશકન્ધરમદસિન્ધુરદલનધુરન્ધરનિશાતશરનખરમ્ ।
પટુમવને નિગમવનેચરમવનેઃ કન્યયા હરિં કલયે ॥ ૧૦૨॥

કપિકુલકલિતપરિધયે કરુણાનિધયે શરાસ્તવારિધયે ।
વિતનોમિ દાશરથયે વિનતિં સીતાવિહારસારથયે ॥ ૧૦૩॥

વન્દેઽહં દીનદયાવાસં દેહકૃતજલદસન્દેહમ્ ।
તં જનકજાક્ષિરઞ્જનતારુણ્યમપાઙ્ગસઙ્ગતારુણ્યમ્ ॥ ૧૦૪॥

રક્ષોનીકં દલયન્કન્દલયન્યોઽભવન્મુદમૃષીણામ્ ।

ઇષુણા સહસા લવનં સાલવનં નીતવાન્સ મે શરણમ્ ॥ ૧૦૫॥

શશધરખણ્ડમપડનશરાસનિરાસકલા
કુશલકરામ્બુજેઽમ્બુદકદમ્બવિડમ્બચણે ।
નિશિચરસિંહસંહનનલાવિશિખં વિશિખં
દધતિ દધામિ ધામનિ મનો મુનિમોદપદે ॥ ૧૦૬॥

ધરણિસુતાજયોધરધરાધરકૂટતટી-
ઘુસ-ણરજોભિશોભિતભુજાન્તરબન્ધુરયા
કવચિતમેકયા કરણમન્તર્દં તરુણી-
કૃતશિલયા દિનાધિપકુલોદયયા દયયા ॥ ૧૦૭॥

દશરથસૂનવે નવસુધાયશસે વસુધા-
દુહિતૃવિહારગૌરવપુષે કરુણાવપુષે ।
પ્રણતિમુદારનીરનિધિસાધ્વસદાય સદા
કુવલયદામકોમલતનૂરુચયે રચયે ॥ ૧૦૮॥

દશમુખભઙ્ગસઙ્ગમિતસર્વસુપર્વચતુ-
ર્વદનસવિસ્તરસ્તવનિવર્તિતમર્ત્યમતૌ ।
હૃદયમરાતિભીતિકરણેષુધનુઃસ્મરણે
કલિહરનામ્નિ ધામ્નિ રુણાનિલયે કલયે ॥ ૧૦૯॥

ભુજગકલાપચાપપરિભઞ્જનસઞ્જનિત-
સ્તુતિ ભુજવિક્રમક્રમગૃહીતમહીતનયા ।
મમ હૃદિ વાસના સ્મરતિ સઙ્ગરરઙ્ગરણ-
દ્દશમુખસર્પદર્પભરશિક્ષણપક્ષિપતિઃ ॥ ૧૧૦॥

અરવિન્દજદલસુન્દરનયનં દરહસિતં
મણિકુણ્ડલકૃતમપડનમુખમણ્ડલશશિનમ્ ।
રઘુપુઙ્ગવમિદમઙ્ગજમદભઙ્ગદવપુષં
મમ ચિન્તતુ હૃદયં તતમપિ કૃન્તતુ દુરિતમ્ ॥ ૧૧૧॥

નિગમાવલિસુગમાકૃતિ ગતયે રિપુહતયે
વિનતામરજનતાવૃતજનુષે ધૃતધનુષે ।
અનયાશરજનયામ્યનગરવેદનગુરવે
તનુમો નતિમનુમોદિતયતયે રપુષતયે ॥ ૧૧૨॥

દશકન્ધરભૃશકમ્પિતસુમનોભયશમનો
નદનાયકકદનાશુગહૃદયો મમ હૃદયે ।
સુજનોચિતભજનો ઘનરુચિરાકૃતિરચિરા-
દુપયાતિ સ કૃપયાઽવનિસુતયા સહ હિતયા ॥ ૧૧૩॥

ક્ષણદાચરગણદારણચણદારુણવિશિખં
કરુણારસવરુણાલયમરુણાન્વયતિલકમ્ ।
પ્રિયયા ઘનદયયા સવિનયયા સહ મિલિતં
સ્મર માનસ ચરમાયુષિ પરમાપદિ સુખિતુમ્ ॥ ૧૧૪॥

ભજ માનસ પરિપાલિતભજમાનસમુદયં
કપિલક્ષણ વિરહાસહકપિલક્ષણનિકટમ્ ।
રઘુનન્દનમઘભઞ્જનરપુનન્દનવનિકે
કલિતાપદમમરદ્વિષિ કલિતાપદકથનમ્ ॥ ૧૧૫॥

ગુરુત્વરાકૃતાનતીન્મરુત્વદાદિદિક્પતી-
નતીત્ય તીવ્રમઞ્જનાસુતાદિમાઞ્જનાનપિ ।
ક્રમેણ મેઽયતે મનસ્તમેવ મેઘમેચકં
કરસ્થચાપસાયકં કકુત્સ્થવંશનાયકમ્ ॥ ૧૧૬॥

કરારવિન્દયોઃ શરં શરાસનં ચ બિભ્રતી
બિસપ્રસ્તસપ્રભા ભૃશં વિશાલયોર્દૃશોઃ ।
તનૂકૃતાભ્રવિભ્રમા મનૂદિતાન્વયક્રમા
દયા મહીસુતાસખી મયા મનસ્યુપાસ્યતે ॥ ૧૧૭॥

દશાનનં નિબર્હિતું ભૃશાનતામરોક્તિભિ-
ર્ગૃહીતમર્ત્યવિગ્રહા મહીતલે સકૃન્મયા ।
મદીયવંશદેવતા યદીયમીડ્યતે તદા
કૃતાન્તતો ન મે ભયં નિતાન્તભીષણાદપિ ॥ ૧૧૮॥

યમાર્યમાદિપઞ્ચકક્રિયોપભોગિભીતિદં
યમાર્યમાહુરાગમા મહાત્મનામિહાશ્રયે ।
વિભાવરીચરેશ્વરપ્રભાવદાવપાવકે
વિભાવરીણવૈભવે મનો વિનોદમેતિ ચ ॥ ૧૧૯॥

ભજામહે વયં સુધાભુજામહેયસેવનં
ભુજામહેભહસ્તસઙ્ગૃહીતબાણકાર્મુકમ્ ।

ઉદારસારરાક્ષસચ્છિદારસાકુલં રણે
સદારસાનુજસ્થિતિં સદા રઘૂદ્વહં પ્રભુમ્ ॥ ૧૨૦॥

સહસ્રં સન્ત્યન્યે શતમખશશાઙ્કપ્રભૃતયઃ ।
પરાવૃત્તં તેભ્યઃ પ્રસજતિ મનો મે ક્વચિદપિ ।
નવામ્ભોદશ્યામે નલિનદલસોદર્યનયને
ધનુર્બાણાકલ્પે ધરણિતનયાવિભ્રમપદે ॥ ૧૨૧॥

શરાસં બિભ્રાણાં શાતમખશરાસાભમિષુણા
સહારાતિગ્રીવારુધિરમધુસેવારુચિમતા ।
ભજામો જીમૂતશ્રિયમવનિજામોહનતનું
દયાવશ્યાપાઙ્ગાં દશરથતપસ્યાપરિણતિમ્ ॥ ૧૨૨॥

મદક્ષીબક્ષ્વેલામુખરખરકીલાલઘુસૃણ-
દ્રવૈરાલિમ્પન્તં રણધરણિમેણીદૃશમિવ ।
ભજે વ્યોમસ્થાનાં નયનકુતુકસ્થાનસમરં
જનસ્થાનારણ્યાયતનમનરણ્યાન્વયમણિમ્ ॥ ૧૨૩॥

ભ જાને પ્રાચીને જનુષિ સુકૃતં કિં ન્વકરવં
સતાં વંશે ચાહં સમજનિષિ કીદૃઙ્મહિમનિ ।
અધીશો લોકાનાં મમ હૃદયમારોહતિ યતો
જગદ્વન્દ્યઃ શ્રીમાઞ્જનકનૃપકન્યાસહચરઃ ॥ ૧૨૪॥

સ્ફુરન્નાનાકલ્પં ભુજપટિમજલ્પાકપુરભિ-
દ્ધનુષ્કં કિષ્કિન્ધાનવનૃપતિસન્ધાનચતુરમ્ ।
કમપ્યન્તઃ કુર્વે કરતલગૃહીતેષુધનુષં
તમાલશ્યામાઙ્ગં તપનકુલરાજન્યતનયમ્ ॥ ૧૨૫॥

ગિરિજાપતિગીયમાનનામ્ને
નલિનીનાયકવંશભાગ્યભૂમ્ને ।
પ્રપાતોઽસ્મિ પયોદમેચકિમ્ને
વનમાલાધરવક્ષસે મહિમ્ને ॥ ૧૨૬॥

દિક્પાલસ્મયઘસ્મરક્રમદશગ્રીવગ્રહવ્યગ્રદોઃ -
સ્તમ્ભાડમ્બરકાર્તવીર્યવિજયવ્યાખ્યાતમુખ્યૌજસઃ ।
જેતારં જમદગ્નિજન્મન ઋષેર્વીરસ્ય સારસ્વત-
સ્રોતઃ સ્યૂતઘનાલિમાલિખતિ મે ચેતઃ શરણ્યં નરમ્ ॥ ૧૨૭॥

અઙ્કે નિવેશિતવિદેહકુમારિકાણાં
લઙ્કેશદારલલિતાસહસાયકાનામ્ ।
આસારવાહિકરુણાભૃદપાઙ્ગિતાનાં
કાસામપિ પ્રપદનં કલયામિ ભાસામ્ ॥ ૧૨૮॥

ન હિ તન્ન કરોમિ યન્નિષિદ્ધં
વિહિતં યદ્યપિ કર્મ નચાચરામિ ।
ધરણીદુહિતુસ્તથાપિ નાથં
શરણીકૃત્ય કૃતાર્થતામુપૈમિ ॥ ૧૨૯॥

અયં શક્રાદીનાં ગણમગણયિત્વા દિવિષદા-
મુપેક્ષ્ય સ્વચ્છન્દં દ્રુહિણમનવેક્ષ્ય ત્રિનયનમ્ ।
પદત્રસ્યાપિ શ્રીકરમૃષિવઙ્કલ્મષહરં
નમસ્કારોઽસ્માકં રઘુપતિપદાબ્જં મૃગયતે ॥ ૧૩૦॥

પ્રત્યગ્રામ્બુદજાલનીલવપુષં પાણિસ્ફુરત્કાર્મુકં
પાર્શ્વદ્વન્દ્વનિવિષ્ટપત્ન્યવરજં રાજન્યમેકં પ્રભુમ્ ।
નેત્રશ્રીનિગૃહીતનીરજલદચ્છાયામદં મે મુદા
ચેતઃ શીતમયૂખશેખરધનુર્દ્રોઢારમાઢૌકતે ॥ ૧૩૧॥

અસુપવનભુજઙ્ગીભૂતબાણામરીણાં
નિગમવનકુરઙ્ગીં નીરદશ્યામલાઙ્ગીમ્ ।
મદનતરલસીતામાનસામ્ભોજભૃઙ્ગીં
કલયતિ હૃદયં મે કામપિ પ્રેમભઙ્ગીમ્ ॥ ૧૩૨॥

જ્યાવલ્લિ કારણવશાદ્રઘુવંશકેતોઃ
કર્ણાન્તમેષ્યસિ કદાપિ વિકૃષ્યમાણા ।
દેવે નિવેદય તદા મમ દૌરવસ્થ્યં
ધર્માશ્રિતાસિ યદતઃ કિલ તે બ્રવીમિ ॥ ૧૩૩॥

કૃત્વા સ્થાવરતાવહાનિ કતિચિત્પાપાનિ પાપપ્રિયો
નાભૂવં સરયૂતટે તૃણમપિ પ્રાગેવ કસ્માદહમ્ ।
યત્તત્રત્યચરાચરેભ્ય ઇવ મે દેવઃ સ્મરાવિષ્કૃત-
સ્વર્ગસ્ત્રૈણનિસર્ગકેલિમધુરાન્સાન્તાનિકાન્દાપયેત્ ॥ ૧૩૪॥

હિન્દોલભૂષણમકૃત્રિમવાક્તરુણ્યા

મન્દોદરીમદનકેલિસમાપનાસ્ત્રમ્ ।
કેલીસખં જનકરાજકિશોરિકાયા
નાલીકકાર્મુકધરં નરમાશ્રયામઃ ॥ ૧૩૫॥

ચેતઃ શતક્રતુમુખેષુ મખાશનેષુ
તિષ્ઠન્તુ નિષ્ઠુરપુરાણતપોબલેન ।
ઉત્કણ્ઠતેઽદ્ય દશકણ્ઠમદદ્વિપેન્દ્ર-
કણ્ઠીરવં કમપિ વીરમુપાસિતું નઃ ॥ ૧૩૬॥

પ્રાચીનપ્રભવશતાર્જિતૈસ્તપોભિઃ
પ્રોન્મીલત્કુતુકતરઙ્ગમન્તરઙ્ગમ્ ।
દિષ્ટ્યા મે દિનકરવંશદીપમેકં
કોદણ્ડાભરણમુપૈતિ કોસલેન્દ્રમ્ ॥ ૧૩૭॥

કારુણ્યામૃતપરિવાહભાગપાઙ્ગં
વૈદેહીસ્તનઘનસારવાસિતાઙ્ગમ્ ।
નારાચક્ષપિતનદીશ્વરાવલેપં
ધ્યાયામઃ કમપિ કરાત્તવાણચાપમ્ ॥ ૧૩૮॥

લઙ્કેશદ્વિરદમૃગાધિપો ગુણાનાં
સઙ્કેતસ્થલમવનીસુતાસહાયઃ ।
નિર્વેલપ્રસૃદતયોઽસ્તુ મે શરણ્યઃ
સર્વેષામપિ જગતાં સ કશ્ચિદીશઃ ॥ ૧૩૯॥

અશનિપરુષઘોષા જીવિતં હર્તુકામા
યમભટજનપઙ્ક્તિર્યાવદાયાતિ ભીમા ।
મરકતમણિનીલે મૈથિલીકેલિલોલે
મહિમનિ મમ તાવન્મગ્નમસ્ત્વન્તરઙ્ગમ્ ॥ ૧૪૦॥

દેહાવસાનસમયે દયયા રઘૂણાં
વીરઃ કરામ્બુજવિરાજદભીતિમુદ્રઃ ।
આરુહ્ય પુષ્પકમલઙ્કૃતવામભાગો
દેવ્યા વિદેહસુતયા મમ સન્નિધત્તામ્ ॥ ૧૪૧॥

સુરૈઃ પ્રથમઃ સ્તુતા તદનુ યોગિભિર્ભાવિતા
તતઃ પ્લવગભલ્લુકૈર્જય જયેતિ સમ્ભાવિતા ।
જગત્રિતયનાયિકા જનકરાજકન્યાન્વિતા

મદીયકુલદેવતા વસતિ રત્નસિંહાસને ॥ ૧૪૨॥

આશ્ચર્યં ન કિમનવેક્ષ્ય લોકપાલાન્
ઉલ્લઙ્ઘ્ય દ્રુહિણમુપેક્ષ્ય ચન્દ્રચૂડમ્ ।
અસ્માભિઃ સવિનયમઞ્જલિઃ કૃતોઽયં
પાદાબ્જં ભજતિ પયોધિબન્ધનસ્ય ॥ ૧૪૩॥

શ્રીકણ્ઠાયુધશિથિલીકૃતિપ્રવીણો
નિઃશેષીકૃતભૃગુનન્દનાવલેપઃ ।
સ્રોતસ્વિન્યધિપતિસૂચિતપ્રતાપો
દેવો મે દશમુખશાસનઃ શરણ્યઃ ॥ ૧૪૪॥

સુત્રામપ્રમુખસુપર્વવન્દ્યલીલં
ભલ્લૂકપ્રવગપરિષ્કૃતાઙ્ઘ્રિમૂલમ્ ।
વૈદેહીવલયપદાઙ્કશોભિતાંસં
ચેતો મે સ્મરતિ ચિરન્તનં પુમાંસમ્ ॥ ૧૪૫॥

સઙ્ક્રન્દનસ્યન્દનભૂષણાનાં
નારાચધારાર્દિતરાવણાનામ્ ।
વેમાનિકાશ્ચર્યરણક્રમાણા-
મધ્યેમિ કેષામપિ વિક્રમાણામ્ ॥ ૧૪૬॥

આમ્નાયમૌલિમણિમબ્જભવાદિવન્દ્યં
નામ્ના વિભૂષિતનગેન્દ્રસુતામુખેન્દુમ્ ।
દ્વૈધીકૃતેશધનુષં પુરુષં તમેકં
નાથં વિધાય હૃદયં મમ નાનટીતિ ॥ ૧૪૭॥

સુગ્રીવાઙ્ગદજામ્બવદ્ધનુમતાં સૂક્ષ્મેક્ષિકાલક્ષિતં
શ્રુત્વા મન્ત્રમનન્યતન્ત્રહૃદયે શ્ચ્યોતદ્યોર્મીમયે ।
દર્પાન્ધં દશકન્ધરં વિજહતસ્તદ્ભ્રાતુરભ્યાગમં
સાર્થીકુર્વતિ નિર્વૃતિં ભજતિ મે સ્વાન્તં કબન્ધાન્તકે ॥ ૧૪૮॥

પારાવારતટે ધનુઃશરપરિષ્કારાગ્રહસ્તામ્બુજં
નમ્રસ્યાશરનાયકાનુજનુષો નાથીભવદ્યાચતઃ ।
મેઘશ્યામલકાન્તિમેદુરકૃપામેદસ્વિનેત્રાઞ્ચલં
કિઞ્ચિદ્વસ્તુ નિવસ્તુમસ્તુ હૃદિ મે કીશાચ્છભલ્લાવૃતમ્ ॥ ૧૪૯॥

ઉત્સૃજ્યાગ્રજમુગ્રજલ્પિતમપિ ક્રવ્યાદભવ્યાધિપં
સમ્પ્રાપ્તેન વિભીષણેન સચિવૈઃ સાર્ધં સ્થિતેનામ્બરે ।
દીનત્રાણધુરીણ દેવ કરુણા દેયા મયીત્યર્થિતં
ભક્તાસ્મો હૃદિ રાઘવં પરિવૃતં ભલ્લૂકશાખામૃગૈઃ ॥ ૧૫૦॥

સુગ્રીવાગતમેનમાનય દશગ્રીવાનુજં વા દશ-
ગ્રીવં વા પ્લવગેન્દ્ર કિં ગણનયા દત્તં મયાસ્યાભયમ્ ।
ઇત્યામન્ત્ર્ય વિભીષણાય દદતો લઙ્કાધિપત્યં પ્રભો-
ર્ધ્યાયામઃ પ્રતિપન્નસન્નતદયાદીક્ષાન્કટાક્ષાઙ્કુરાન્ ॥ ૧૫૧॥

દર્ભાસ્તરન્યસ્તશરીરભારં સિન્ધોઃ પ્રસાદાય રઘુપ્રવીરમ્ ।
મદવ્યપેતં મહતિ પ્રતાપેઽપ્યન્વેતિ નન્વેષ મમાન્તરાત્મા ॥ ૧૫૨॥

દાનોત્કર્ષક્ષમમુપદધદ્દક્ષિણં બાહુદણ્ડં
દીર્ઘીકુર્વન્નિતરમસિતજ્યાકિણાઙ્કપ્રકોષ્ઠમ્ ।
પ્રાન્તે કૃત્વા ધતુરિષુમપિ પ્રાતુમબ્ધેઃ પ્રસાદં
દેવો દર્ભાસ્તરણશયિતશ્ચિત્તભુત્તમ્ભતે નઃ ॥ ૧૫૩॥

ભક્તિપ્રહ્વવિભીષણાર્પિતકરન્યસ્તૈકહસ્તામ્બુજઃ
સુગ્રીવેણ પુરો નિવારિતજનઃ સૌમિત્રિણાનુદ્રુતઃ ।
સમ્ભ્રામ્યદ્ભરતોપનીતચરણત્રાણાર્પિતાઙ્ઘ્રિદ્વયો
દિષ્ટ્યા સમ્પ્રતિ માનસં વિશતિ મે રાજૈષ રાજ્ઞામપિ ॥ ૧૫૪॥

વયશ્ચતુરમસ્થિરં ગુણવતી વાધૂરદ્રુવા
ન સમ્પદવિનશ્વરા ન ચિરજીવિનો બાન્ધવાઃ ।
ઇતિ સ્વયમવેત્ય ચિદ્ઘનસદાત્મકે શાશ્વતે
રમસ્વ રઘુપુઙ્ગવે હૃદય નાન્યદાલોચય ॥ ૧૫૫॥

ઉત્તુઙ્ગભૂમિતનયાકુચશૈલશ ૃઙ્ગ-
કાશ્મીરગૈરિકપરાગકરમ્બિતાઙ્ગઃ ।
ભગ્નક્ષપાચરતરુર્ભરતાગ્રજન્મા
મત્તદ્વિપો વિહરતાન્મનસિ હ્રદે મે ॥ ૧૫૬॥

રણભુવિ કૃતલઙ્કાતઙ્કહુઙ્કારગર્ભ-
ભ્રુકુટિવિકટવ કાર્મુકારૂઢપત્રઃ ।
નિખિલનિજસપક્ષક્ષેમકામઃ પુરો મે
સ ભવતુ રઘુવીરર સાધ્વસધ્વંસહેતોઃ ॥ ૧૫૭॥

રણપ્રવણરાવણવ્રણદબાણમોક્ષક્ષણ-
ક્વણદ્ગુણધનુર્ધ્વનિત્વરિતમારિતારિવ્રજઃ ।
જગદુરિતજર્જરીકરણજાગરૂકક્રમો
મમ વ્યપનયેદ્ભયં મનુકુલપ્રવીરાગ્રણીઃ ॥ ૧૫૮॥

સ્ફુરદભિનવરત્નશ્રેણિરજ્યત્કિરીટે
સુરભિલવનમાલાલઙ્કૃતોરઃકવાટે ।
સરતિ ખલુ મનો મે સર્વલોકૈકનાથે
પુરભિદભિમતાખ્યે પુંસિ સીતાસનાથે ॥ ૧૫૯॥

પુષ્પાણ્યાક્ષિપતા ફલાનિ હરતા પૃથ્વીરુહાન્ભઞ્જતા
વ્યાઘ્રાન્દ્રાવયતા દ્વિપાન્પ્રહરતા કણ્ઠીરવાન્કર્ષતા ।
રક્ષઃસૈન્યજિગીષુણા હરિચમૂચક્રેણ સાકં વ્રજન્
સ્વામી ચેતસિ મે મુદં સ કુરુતે ભૂમીસુતાવલ્લભઃ ॥ ૧૬૦॥

કદનમરિનિગર્યાઃ કર્તુમુદ્દામભીમૈઃ
કપિભિરનિલસૂનુસ્કન્ધમારુહ્ય યાન્તમ્ ।
કનકશિખરિશૃઙ્ગારૂઢકાલામ્બુદાભં
કમપિ મનસિ વીરં કુર્મહે શર્મહેતોઃ ॥ ૧૬૧॥

ઉગ્રે તપસ્યપિ પયોધિમુપેક્ષમાણં
બાણત્રુટત્તિમિતિમિઙ્ગિલરક્તશોણમ્ ।
કુર્વન્ રુષા મનુકુલીનકુમારવીરઃ
કૌતૂહલં દિશતિ મે હૃદિ કૌસલેયઃ ॥ ૧૬૨॥

જલધિજનિતકોપજાયમાનભ્રુકુટિવિટઙ્કભયઙ્કરાનનાય ।
ગગનચરગણઃ પ્રણામમસ્મત્કુલપતયે કુરુતે સ્મ રાઘવાય ॥ ૧૬૩॥

જલદનીલતનૌ જનકાત્મજાવદનચન્દ્રવશીકૃતમાનસે ।
શરશરાસનચારુકરામ્બુજે રઘુપતૌ રમતાં હૃદયં મમ ॥ ૧૬૪॥

દલદુત્પલદામકોમલાઙ્ગં દયમાનં મનુવંશશૈલશૃઙ્ગમ્ ।
કરપદ્મગૃહીતચાપવાણં કલયે કઞ્ચન પૂરુષં પુરાણમ્ ॥ ૧૬૫॥

પિપાસિતાસ્ત્રનિષ્પીતપ્રેયસીમાતૃમેખલમ્ ।
વસ્તુ વિધ્વસ્તપૌલસ્ત્યં પુરસ્તાદાવિરસ્તુ નઃ ॥ ૧૬૬॥

સ્મરતરલવિદેહરાજકન્યા-
કુચતટકુઙ્કુમયોગપિઞ્જરાય ।
મનુકુલમણયે નમોઽસ્તુ ગૌરી-
રમણશરાસનસાલકુઞ્જરાય ॥ ૧૬૭॥

દ્વિતીયો નિષ્યન્દઃ ।
વન્દે તમિન્દીવરદામનીલં વન્દારુમન્દારપદારવિન્દમ્ ।
રામં સુરામઙ્ગલકૃદ્વિરામં ક્ષેમઙ્કરામન્દશરાભિરામમ્ ॥ ૧॥

ભજામિ દેવં ભરતાગ્રજં તં પદામ્બુજં યસ્ય પવિત્રકીર્ત્તેઃ ।
શિરાંસિ વા શીલયતિ દ્યુતીનાં મનાંસિ વા મત્કુલસમ્ભવાનામ્ ॥ ૨॥

મમાન્તરુન્મીલતિ માનવેન્દુર્મહીસુતાવિભ્રમસૂત્રકારઃ ।
નિપાતયામાસ નિશાચરેન્દ્રં વિદન્બુધાનાં વિધિગૌરવં યઃ ॥ ૩॥

દેવતાસુ શરણીકરણાર્થં ધાવતા સુચિરમેકતમા મે ।
ચેતસા ગતિવશેન ગૃહીતા ધૂતસાગરમદા વિશિખૈર્યા ॥ ૪॥

કુમ્ભજાદિમુનિકોટિનુતં ચેત્તં ભજાનિ તપનાન્વયદીપમ્ ।
વાસરે ન ચરમે ભવિતા મે કાસરેણ સહ કાલનિરીક્ષા ॥ ૫॥

આમનેમ યદિ કોમલવર્ણં રામનામ ભુવને મહનીયમ્ ।
વ્યોમસીમનિ વસેમ સુખાખ્યે ધામ ડામરમિયામ ન યામ્યમ્ ॥ ૬॥

નૂતનાગમઘનાભશરીરે ભૂતનાથધનુરક્ષમસારે ।
પૂતનામનિ મનો યદિ રામે યાતના ન ભવિતા યમતો મે ॥ ૭॥

પૂર્વજન્મકૃતપુણ્યમહિમ્ના પુઞ્જિતેન મતિરુજ્ઝિતનિમ્ના ।
કુત્રચિદ્વિહરતે ગુણતુઙ્ગે કુમ્ભકર્ણકુમુદૈકપતઙ્ગે ॥ ૮॥

પાપિનોઽયમિહ પાવયિતેતિ પ્રત્યયેન મમ ચિત્તમુપૈતિ ।
ભૂયસા હતનિશાચરલોકં ભૂસુતાહૃદયતસ્કરમેકમ્ ॥ ૯॥

અઙ્કિતં જનકજાકુચભાજા કુઙ્કુમેન ચ કુરઙ્ગમદેન ।
તં કઠોરશરકારિતલઙ્કાતઙ્કમેવ મતિરેતિ યુવાનમ્ ॥ ૧૦॥

ઉત્પલદ્યુતિમુદઞ્ચિતયોગં વિદ્યુતેવ ચ વિદેહકુમાર્યા ।
ચાતકો નવમિવામ્બુદમેકં ચાપભૂષિતમુપૈતિ મમાત્મા ॥ ૧૧॥

અસ્તુ મે હૃદયમપ્યણુમાત્રં વસ્તુમેવ વલતે કૃપયાઽસ્મિન્ ।

કોટિભિઃ પરિવૃતઃ પ્લવગાનાં કોઽ પિ કોકનદબન્ધુકુલીનઃ ॥ ૧૨॥

નિગ્રહે યુધિ નિશાટચમૂનામુગ્રહેતિભિરુદગ્રવિહારમ્ ।
તાપસામરશરણ્યમુપાસે ચાપસાયકધરં રઘુવીરમ્ ॥ ૧૩॥

હસ્તેનામ્બુજકોમલેન ચરણામ્ભોજક્વણન્નૂપુરં
કૌસલ્યાકરપલ્લવાઙ્ગુલિદલાન્યાલમ્વ્ય મન્દં ચરન્ ।
પશ્યત્પઙ્ક્તિરથાક્ષિપઙ્કજનવાદિત્યો હરત્યેવ મે
ચિત્તં કોઽપિ ચિરન્તનોક્તિયુવતેરુત્તંસભૂતઃ શિશુઃ ॥ ૧૪॥

ચેતઃ શીતલયત્યધિષ્ઠિતવતા સૌધસ્થલીમુન્નતા-
માનન્દાર્દ્રિતચેતસા દશરથેનાલોકિતાભ્યાગમઃ ।
શ્યામાઙ્ગઃ શરદિન્દુબિમ્બવદવઃ સ્મેરારવિન્દેક્ષણઃ
કોઽપિ સ્વર્ણકુથાભિરામકલભસ્કન્ધાધિરૂઢઃ શિશુઃ ॥ ૧૫॥

મણિસરધરં કણ્ઠે મધ્યે હિરણ્મયકિઙ્કિણી-
નહનસુભગં નાલીકાક્ષં નવામ્બુદમેચકમ્ ।
દશરથનૃપસ્ત્રીણામઙ્કેષુ સઙ્ક્રમિતં ક્રમા-
દ્વિચિનુત જનાસ્ત્રય્યન્તાર્થં વિડમ્બિતશૈશવમ્ ॥ ૧૬॥

ગુરુપરિચરણેનાલં કુવલયનીલં ગૃહીતશિશુલીલમ્ ।
દ્રક્ષ્યથ દશરથનૃપતેઃ શુદ્ધાન્તેષ્વાગમાન્તસિદ્ધાન્તમ્ ॥ ૧૭॥

પ્રતિકલમજસૂનુસુન્દરીભિઃ પૃથગુપલાલિતમઙ્કમણ્ડલેષુ ।
વિકચકુવલયદ્યુતિં વિનોદાદુપનિષદર્થમુદીક્ષિતું યતધ્વમ્ ॥ ૧૮॥

હત્વા ચણ્ડપરાક્રમં દશમુખં ક્ષિપ્રં રણપ્રાઙ્ગણે
વામં ન્યસ્ય કરં શરાસશિખરે સવ્યે શરં બિભ્રતઃ ।
બન્ધસ્રંસિજટાભરસ્ય નિટિલવ્યાકીર્ણઘર્મામ્ભસો
દેવસ્યાવતુ નસ્ત્રિભઙ્ગિલલિતા ધીરોદ્ધતા ચ સ્થિતિઃ ॥ ૧૯॥

કેનાપિ કીશભટકોટિનિષેવિતેન
મન્દોદરીમધુમદાસહમાર્ગણેન ।
જીમૂતમેચકરુચા જલજેક્ષણેન
વીરેણ તુષ્ટમપિ હૃષ્ટમિદં મનો મે ॥ ૨૦॥

ધારાધીશ્વરવંશમણ્ડયિતરિ ક્રોધોત્પતત્તાડકા-
હન્તર્યધ્વરરક્ષિતર્યૃષિવધૂશાપવ્યપાકર્તરિ ।

ચન્દ્રાપીડશરાસભેત્તરિ મહીકન્યાસમુદ્વોઢરિ
ક્રુધ્યદ્ભાર્ગવદર્પભઙ્ક્તરિ મનઃ કુર્યાં નૃવર્યાત્મજે ॥ ૨૧॥

નવકુવલયશ્યામે વામેન બિભ્રતિ પાણિના
ધનુષમિતરેણાજાવાજાનસિદ્ધજયં શરમ્ ।
વિહર હૃદયેદાનીમાનીલજૂટજટાધરે
વિબુધમકુટીહીરે વીરે વિરાધવિરોધિનિ ॥ ૨૨॥

કમપિ ચ પુરુષં કૃપાવિધેયં
ગુહજનનીગુણનીયનામધેયમ્ ।
શરવિદલિતશામ્બરીકુરઙ્ગં
શરણમુપૈતિ મદીયમન્તરઙ્ગમ્ ॥ ૨૩॥

સાન્દ્રં પુષ્યતિ ચમ્પકઃ કુરબકો ધત્તે નવાન્કોરકાન્
માકન્દઃ સ્તબકાન્વ્યનક્તિ બકુલઃ પુષ્પાણિ પુષ્ણાતિ ચ ।
ઝઙ્કુર્વન્તિ મધુવ્રતા વિદધતે ચારુસ્વનં કોકિલાઃ
પશ્યેતિ ક્ષિતિકન્યકામનુનયન્દીવ્યત્યટવ્યાં પ્રભુઃ ॥ ૨૪॥

સ્વેનાલઙ્કૃતપદ્મબાન્ધવકુલાં મેનાતનૂજાપતે-
ર્ભઙ્ક્ત્વા ચાપમવાપિતાં વસુમતીકન્યાકરાબ્જગ્રહમ્ ।
કામપ્યન્વહમાશ્રયેમ કરુણાં કાદમ્બિનીમેચકાં
કાકક્રોષ્ટુકદમ્બસાત્કૃતખરક્રવ્યામટવ્યાં પુરા ॥ ૨૫॥

કલ્યાણી મતિરદ્ય કાઙ્ક્ષિતપરિત્રાણા રઘૂણાં પ્રભું
સૌવર્ણત્સરુરચ્યમાનચલરુચ્યાક્ષેપિકૌક્ષેયકમ્ ।
માયૂરચ્છદમેચકચ્છવિમિલત્પુઙ્ખસ્ફુરન્માર્ગણં
કઞ્ચિત્કાઞ્ચનપટ્ટલાઞ્છનબૃહત્કોદણ્ડમાહિણ્ડતે ॥ ૨૬॥

વાલાસ્ફાલિતવારણૈઃ કરતલવ્યાકર્ણિકપતીરવૈઃ
પાદાઘાતચટચ્ચટાયિતપતત્પ્રોત્તુઙ્ગપૃથ્વીરુહૈઃ ।
ગર્જદ્ભિઃ કપિયૂથપૈઃ સહ દશગ્રીવં વિજેતું વ્રજન્
ઇન્દ્રે ચેતસિ મે સમીરતનયસ્કન્ધેઽધિરૂઢો વિભુઃ ॥ ૨૭॥

અંસે નિષઙ્ગમવસજ્ય કરારવિન્દે
ચાપં શરં ચ જનકાત્મજયા વહન્ત્યા ।
સાકં પ્રસૂતહરણાય વને ચરન્તં
સાકેતનાથમનુયાતિ મનો મદીયમ્ ॥ ૨૮॥

પુણ્યે પઞ્ચવટીનદીપરિસરે પુષ્પાવચાયે કૃતે
પ્રસ્વિન્નાનનપઙ્કજઃ પ્રસૃમરશ્વાસાલસાલોકનઃ ।
શ્રીખણ્ડદ્રુમમૂલવર્તિનિ શિલાપટ્ટે સમન્દાનિલે
વિશ્રામ્યન્સહ સીતયા મનસિ મે વિશ્રામ્યતીવ પ્રભુઃ ॥ ૨૯॥

સેવન્તામિતરે શશાઙ્કશકલોત્તંસં પુમાંસં તથા
વેણૂદઞ્ચિતનાદવઞ્ચિતલસદ્ગોપીજનં વા જનાઃ ।
સેવ્યઃ કશ્ચન નિશ્ચિતો મમ જનસ્થાનાટવીસઙ્કટ-
ક્રવ્યાદૌઘસહસ્રસપ્તકયુગચ્છેદક્રિયાસાહસી ॥ ૩૦॥

ચક્રીકૃત્ય શરાસનં ધલધલાકુર્વત્સુવર્ણાઞ્ચલં
મુઞ્ચન્દિક્ષુ વિદિક્ષુ કાઞ્ચનભૃતઃ પુઙ્ખાનુપુઙ્ખાન્ શરાન્ ।
સ્વામી નઃ ખરસેનયા નિખિલયા સાકં સમીકક્ષિતૌ
કૃત્તક્ષિપ્તભુજાશિરશ્ચરણયા ક્રૂરં પરિક્રીડતે ॥ ૩૧॥

યસ્યાઃ સન્તિ કરાઃ સહસ્રમપિ વા યસ્યાઃ સહસ્રં દૃશઃ
કૃત્વા દેવતયોર્દ્વયોરપિ તયોઃ સ્વસ્થૌ સુતૌ વિશ્રુતે ।
વીરે વિશ્રવસશ્ચતુર્ષ્વપિ સુતેષ્વાદ્યન્તશેષીક્રિયા-
વિદ્યાચુઞ્ચુશિલીમુખે વિહરતે વીતક્લમં મે મનઃ ॥ ૩૨॥

આક્રાન્તં હૃદયં દયાપરવશસ્વાન્તેન દાન્તે જને
ચાપજ્યાપટુઘોષભીષિતનમલ્કલ્લોલિનીકામિના ।
ક્રવ્યાદેષુ કૃતાન્તકેલિકલનાચાતુર્યધુર્યેષુણા
કેનાપિ પ્લવમાનસૈનિકપરીવારેણ વીરેણ મે ॥ ૩૩॥

પ્રચ્છાયદ્રુમ ઋશ્યમૂકશિખરે પાર્શ્વસ્થિતેનૈકશઃ
સુગ્રીવેણ નિવેદ્યમાનજનનસ્થાનપ્રભાવાહ્વયાન્ ।
પશ્યન્વાનરયૂથપાનુપગતાન્પાથોદનીલાકૃતિ-
ર્વીરઃ સાવરજઃ સ ભાતિ હૃદિ મે વિશ્વત્રયાધીશ્વરઃ ॥ ૩૪॥

કૃપારસપયોધિના ખરવરૂથિનીયોધિના
મહામહિમશાલિના મુનિહૃદબ્જકોશાલિના ।
મનો મમ કૃપાણિના શરશરાસમૃત્પાણિના
જટામકુટધારિણા તરલિતં વિરાધારિણા ॥ ૩૫॥

કન્દર્પકોટિશતસુન્દરરૂપધેયં

કચ્ચિત્પ્રભું ભુવનમઙ્ગલનામધેયમ્ ।
નન્વસ્થિરેઽપિ હૃદયે નતિકૃદ્વિધેયં
કુર્મઃ કુશેશયસુહૃત્કુલભાગધેયમ્ ॥ ૩૬॥

મૌલિવિરાજન્મણિમયમકુટીમઙ્કુનિપાતનહૃતરિપુગર્વઃ
સર્વસુપર્વસ્તુતિપદસમરપ્રાઙ્ગણચઙ્ક્વણદિષુગણલીલઃ ।
ભલ્લુકમલ્લપ્લવગવરચમૂપાણિપદાહતિવિરચિતલઙ્કા-
ગોપુરભઙ્ગઃ કુતુકયતિ મનઃ કોઽપિ કુશેશયદયિતકુલીનઃ ॥ ૩૭॥

વાર્ષિકપાથોવહરુચિવપુષા વારિતવારિધિબહલમદેન
પ્રાતરુદઞ્ચત્પ્રભકમલદલપ્રસ્તુતવિસ્તૃતનયનતુલેન ।
નિટિલજટાલીનિબિડિતશિરસા નિસ્તુલકાર્મુકવિશિખધરેણ
ક્રીતમિવાન્તઃકરણમિદમહો કેનચિદાનનસુલભકૃપેણ ॥ ૩૮॥

સુન્દરાકૃતિ યત્કબન્ધવસુન્ધરારુહખણ્ડને
ગન્ધસિન્ધુરદૂમિબન્ધુરસિન્ધુબન્ધધુરન્ધરમ્ ।
યસ્તુ નિસ્તુલમસ્તુ તદ્ધૃદિ શસ્ત્રશસ્તપુલસ્ત્યભૂ-
હસ્તમસ્તકમાસ્તિકસ્તુતિવિસ્તરાર્હયશસ્તતમ્ ॥ ૩૯॥

કૃત્તરાજસમત્તરાવણમુત્તરાધરયોઃ સમં
દત્તમઙ્ગલમુત્તમં નૃષુ ચિત્તમઞ્ચતિ મામકમ્ ।
તં કુતૂહલિ સઙ્કુચલ્લિકુચસ્મયક્ષિતિજાકુચ-
દ્વન્દ્વસઙ્ગમલગ્નકુઙ્કુમપિઞ્જરં રઘુકુઞ્જરમ્ ॥ ૪૦॥

કલ્પકદ્રુમદર્પહૃત્પદપઙ્કજપ્રચલદ્રજઃ
સ્પર્શદર્શિતગૌતમાપ્રિયમેતમપ્રતિમં નરમ્ ।
તુઙ્ગસઙ્ગરરઙ્ગસઙ્ગમિતપ્લવઙ્ગમપુઙ્ગવ-
પ્રેરિતદ્રુમદારિતક્ષણદાચરં ગતિમાચરમ્ ॥ ૪૧॥

ઊર્મિલધ્વનિકાર્મુકચ્છલવાર્મુગુજ્ઝિતમાર્ગણા-
સારદુર્બલવીરકર્બુરવારનિર્ભરકૌતુકૈઃ ।
ગૃધ્રમોદિનિ યુદ્ધસીમનિ સિદ્ધચારણકિન્નરૈઃ
શ્લાઘિતો હૃદિ મોઘિતૈનસિ રાઘવો મમ ભાસતે ॥ ૪૨॥

તાપસામરગોપસાહસિચાપસાયકલાઞ્છનઃ
ચારુગોસ્તનજાનકીસ્તનકૌતુકી સ્તનયિત્નુભાઃ ।
ક્રુધ્યદાપતદુદ્ધતાયુધવિધ્યદન્તકકિઙ્કરે

કશ્ચિદેવ હિ નિશ્ચિતો મમ પશ્ચિમેઽહનિ રક્ષિતા ॥ ૪૩॥

દિષ્ટ્યા સમ્પ્રતિ મે મનઃ  સ્પૃહયતે દુષ્ટાશરાનીકિની-
કષ્ટાપાદનતુષ્ટિકૃત્કપિચમૂશ્રીકામિને સ્વામિને ।
દૂરાદસ્તસુરાર્તયે દશમુખધ્વંસોન્મિષત્કીર્તયે
તત્કાલસ્થિતલોકલોચનસુધાવર્તીભવવન્મૂર્તયે ॥ ૪૪॥

કલમકણિશપુઞ્જપિઞ્જરાઙ્ગ-
પ્લવગકદમ્બકરન્વિતોપકણ્ઠમ્ ।
ઉદયદરુણચન્દ્રબિમ્બચિહ્ન-
પ્રભમુપસર્પતિ માનસં પ્રભું નઃ ॥ ૪૫॥

શરહતદશકધરં ધરિત્રીદુહિતૃપયોધરપત્રલેખધુર્યમ્ ।
કમપિ નૃપકુમારમેકવીરં ભજતિ મનો મમ ભાનુવંશરત્નમ્ ॥ ૪૬॥

વિકચકમલપત્રમિત્રનેત્રં વિકટજટાપટલીભૃદુત્તમાઙ્ગમ્ ।
કપિકુલકલિતાબ્ધિસેતુબન્ધં કમપિ કબન્ધભુજાભિદં ભજામઃ ॥ ૪૭॥

આકાશમધ્યગતનાકાલયપ્રકરશોકાપનોદનજય-
શ્રીકામવાનરસમીકાવપાતિતમહાકાયરાક્ષસકુલમ્ ।
રાકામૃગાઙ્કમધુરાકારવક્ત્રમગનીકાશકાર્મુકધરં
કાકાપરાધસહમાકારયામિ હૃદિ લોકાધિપં રઘુપતિમ્ ॥ ૪૮॥

વન્દારુહૃષ્યદરવિન્દાસનપ્રભૃતિવૃન્દારકવ્રજશિરઃ -
સન્દાનિતાભિનવમન્દારદામમકરન્દાભિષિક્તચરણમ્ ।
તં દાશરથ્યભિહિતં દાનવારિમૃષિવૃદાય મોક્ષપદવી-
સન્દાયિનં ભજતિ મન્દાપિ ગે મતિરિયં દાશકીશસુલભમ્ ॥ ૪૯॥

સુત્રામપાવકપવિત્રાદિદેવજનવિત્રાસનક્ષમભુજા-
મિત્રાતિઘોરદશવક્ત્રાવખણ્ડનજચિત્રાવદાતયશસિ ।
સત્રા શરેણ ધનુરત્ત્રાસુપઞ્ચકમમિત્રાવલેર્દધતિ મે
કુત્રાપિ- ધામનિ પવિત્રાભિધેઽનુષજતિ ત્રાણલિન્તુ હૃદયમ્ ॥ ૫૦॥

તીરાચલોદરવિસારાનુનાદિતગુણારાવભૈરવધનુઃ
દૂરાપવિદ્ધશરધારાનિપાતહૃતનીરાકરસ્મયભરમ્ ।
આરાધનીયમખિલૈરાદિયોગિભિરુદારાનુકમ્પમધુના
ધીરાદરેણ મમ વીરાગ્રગણ્યમયતે રાઘવાન્વયમણિમ્ ॥ ૫૧॥

ભૂતાવસાદિતિ રણે તાદૃશિ ચ્યુતતનૌ તાડિતે દશમુખે
ગીતાપદાનમુપયાતા સુરૈઃ સહ વિનીતાશયેન વિધિના ।
સીતાવિહારસખમાતાતમાવિધિ ચ મે તાવદન્વયભુવાં
નેતારમેવ ભજતે તાપમુજ્ઝિતુમુદીતાદરં મન ઇદમ્ ॥ ૫૨॥

પશ્યન્તઃ શબરાર્ભકાઃ શુકગણભ્રાન્ત્યા જિઘૃક્ષન્તિ યાં
સારઙ્ગાશ્ચ નવોન્મિષત્તૃણધિયા સંરુન્ધતે ચર્વિતુમ્ ।
દૂરાદેવ પલાયતે ફણિકુલં બર્હભ્રમાદ્ભર્હિણાં
સૈષા પઞ્ચવટીજુષો રઘુપતેઃ શોભા પુરો ભાતિ મે ॥ ૫૩॥

અસ્તામીલનમક્ષિનીલનલિનવ્યૂહેન દેહેઽર્ચિતેઃ
શઙ્કાઽઽતઙ્કવિવર્જિતેન શબરસ્ત્રીણાં મૃગીણામિવ ।
વીરશ્ચેતસિ વિશ્વથીકૃતખરોચ્છ્રાયો મહાયોગિનાં
વન્દ્યઃ પઞ્ચવટીવનાન્તરકુટીવાસી મમાસીદતિ ॥ ૫૪॥

પાણ્યોઃ કાર્મુકમાશુગં ચ શિરસિ શ્યામં જટામણ્ડલં
કટ્યા ચીરમુદારમંસફલકે તૂણીરમાબિભ્રતમ્ ।
શાણોલ્લીઢહરિન્મણિસ્મયહરચ્છાયં કૃપાયન્ત્રિતં
ભૂમાનં કમપિ સ્મરન્મરકતશ્યામાયતે મે મનઃ ॥ ૫૫॥

અધિરોહતીવ હૃદયં મમાધુના યુધિ રોષપાતિતવિભીષણાગ્રજઃ ।
સ્મરચારુતામદહરસ્તનુશ્રિયા શરચાપલાઞ્છિતકરામ્બુજઃ પ્રભુઃ ॥ ૫૬॥

અવસાનહીનભવસાગરાન્તરે પતિતઃ પરેતપતિતસ્ત્રસન્નહમ્ ।
શરણીકરોમિ ધરણીકુમારિકાદયિતં દયાવલયિતં દૃગઞ્ચલે ॥ ૫૭॥

કિમનેન મેઽન્યનમનેન લભ્યતે લઘુના યદસ્મિ રઘુનાયકં ભજન્ ।
કુરુતે જનઃ કિમુરુતેજસાઽઽર્જિતે કનકાઞ્ચલે ક્વચન કાચમાર્ગણમ્ ॥ ૫૮॥

મનુરાજવંશજનુરાજવઙ્ગવચ્છિદુરોઽસદાનનદુરાસદાભિધઃ ।
મહતા શરેણ સ હતાશરેશ્વરઃ કૃપયાતિમાત્રમુપયાતિ માનસમ્ ॥ ૫૯॥

એકવારમપિ નાકવાસિષુ વિવેકવાનધિકમેકકો
ધાવતા ન ઘટતેઽવતારયિતુમેવ તાદૃશિ કૃપાં મયિ ।
એહિ માન્યગુણ પાહિ મામિતિ તતોઽહિમાંશુકુલશેખરં
ચેતસાઽવૃણિ નિશાતસાયકવિધૂતસાગરમદં પ્રભુમ્ ॥ ૬૦॥

ભૈરવાહવવિહારવાનરચમૂરવાકલિતરાક્ષસ-

ત્રાસના ગિરિસુતાસનાથપુરશાસનાદૃતનિજાભિધા ।
ઘોરદાનવશરીરદારણવિશારદાશુગધનુર્ધરા
ભાવના પરિજનાવનાનુગુણસેવના મનસિ ભાતિ મે ॥ ૬૧॥

ન ક્ષિણોતિ ખલશિક્ષણોऽતિમમદક્ષિણોદધિમવજ્ઞયા
જોષમાસ્થિતમશેષમાન્યગતિરેષ માર્ગણગણઃ કથમ્ ।
ઇત્યમું મથિતુમત્યમુગ્ચદિહ નિત્યમુજ્છિતરિપૂનિષૂન્
યસ્તમાલિખતિ નસ્તમાલરુચિમસ્તમાયિકમૃગં મનઃ ॥ ૬૨॥

ગીર્વાણૈરિવ કવિભિઃ કૃતાભિમુખ્યે
નિત્યં ચ ક્ષિતિસુતયા નિબદ્ધસખ્યે ।
મચ્ચેતઃ સરતિ મનુપ્રસૂતિમુખ્યે
મૈનાકસ્વસૃમહનીયમઙ્ગલાખ્યે ॥ ૬૩॥

કિં બ્રૂમહે તત ઇતોऽપિ ગવેષણાયા-
માલમ્બનં ક્વચિદપિ ત્રિજગત્યલબ્ધ્વા ।
હન્ત દ્રુતં પતતિ મામકમન્તરઙ્ગં
કાકુત્સ્થનામનિ ગભીરકૃપામ્બુરાશૌ ॥ ૬૪॥

કાદમ્બિનીનિભરુચા કમલેક્ષણેન
કાત્યાયનીકમનકાર્મુકભઞ્જનેન ।
કેનાપિ કીલિતપયોનિધિના ગૃહીતં
ચિત્તં તથાપિ મમ ચિન્તયતે ન કિઞ્ચિત્ ॥ ૬૫।

નક્તઞ્ચરેન્દ્રજયનન્દિતવિષ્ટપેન
નાલીકિનીરમણવંશનવાઙ્કુરેણ ।
નાથેન બદ્ધમપિનદ્ધનદીશ્વરેણ
નન્વદ્ય માનસમિદં મમ નાનટીતિ ॥ ૬૬॥

દશગ્રીવોદગ્રસ્મયદલનકેલીચણશરઃ
શરીરશ્રીનિર્વાપિતહરિતદૂર્વારુચિમદઃ ।
સ કશ્ચિન્નિશ્ચિન્તઃ પ્રવિશતિ કઠોરેऽપિ હૃદિ મે
દૃષદ્રૂક્ષારણ્યભ્રમણકૃતશિક્ષાબલ ઇવ ॥ ૬૭॥

ભ્રાન્ત્વા દિક્ષુ વિદિક્ષુ દુર્લભસુખોપાયં મદીયં મનો
દિષ્ટ્યા ધાવતિ દેવતાઃ પરિહરદ્દીનાનુકમ્પોજ્ઝિતાઃ ।
પ્રાપ્તે સાપ્તપદીનતાં કરુણયા દાશેન કોશેન વા

નન્દિગ્રામકૃતાધિપત્યચરણત્રાણે પુરાણે નરે ॥ ૬૮॥

ઉત્પ્લુત્ય વ્રજતાં સ્ફુટભ્રુકુટિકં હુઙ્કારમાતન્વતાં
વાલાગ્રાણિ વિધૂન્વતાં કિલિકિલાકોલાહલં કુર્વતામ્ ।
યોધાનામરવિન્દકેસરરુચાં મધ્યે તમધ્યેતિ મે
ચેતશ્ચાપશિલીમુખોજ્જ્વલકરામ્ભોજં રઘૂણાં પ્રભુમ્ ॥ ૬૯॥

પ્રાયેણ ચેતસિ મમ પ્રણયેન વસ્તુ-
મસ્મત્પ્રભુઃ સમુપસર્પતિ પુષ્પકેણ ।
ચણ્ડોન્મિષત્કિલિકિલાશ્ચલદીર્ઘપુચ્છા
યચ્છાદયન્તિ ગગનં ગણશઃ પ્લવઙ્ગાઃ ॥ ૭૦॥

કોઽયં વિકર્ષતિ મનો મમ કુઞ્જરેન્દ્રો
નાલીકનાલમિવ નન્વયમેવ જાને ।
રક્ષોધિરાજરમણીહૃદયાર્પિતાગ્નિ-
રક્ષૌહિણીશતપતિઃ કપિભલ્લુકાનામ્ ॥ ૭૧॥

ભલ્લૂકપ્રકરેણ જઙ્ગમમષીપાષાણખણ્ડત્વિષા
ગોલાઙ્ગૂલકદમ્બકેન વદને નીલાઞ્ચિતશ્મશ્રુણા ।
પક્વોદુમ્બરપાટલેન ચ કપિવ્યૂહેન નીરન્ધ્રયા
વાહિન્યા સહ વર્તતે હૃદિ સ મે સ્તોકેઽપિ લોકેશ્વરઃ ॥ ૭૨॥

સ્વચ્છન્દં કપિભિર્વિહૃત્ય સુતરામાશ્લિષ્ય દિવ્યાન્મુની-
ન્દિક્પાલેષ્વવતીર્ય મન્દમિતરાન્દેવાનતીત્યાઞ્જસા ।
દીનં દૂરત એવ સાધ્વસવશાત્તિષ્ઠન્તમેતીવ માં
દેવસ્ય ક્ષણદાચરેન્દ્રજયિનો દૃષ્ટિર્દમાશીતલા ॥ ૭૩॥

વેદાન્તવિભ્રમવને વિહિતપ્રચારઃ
કાકુત્સ્થવંશમવતીર્ય કદાપિ ખેલન્ ।
વાલ્મીકિવાઙ્નિકરવાગુરયા ગૃહીતો
હૃત્પઞ્ચરં વ્રજતિ કશ્ચિદયં શુકો મે ॥ ૭૪॥

દશકણ્ઠકલત્રકણ્ઠરિક્તીકૃતિધૌરેયશરે ક્વચિન્નરેન્દ્રે ।
કલહંસ ઇવ સ્ફુટેઽરવિન્દે કલયત્યેષ કુતૂહલં મમાત્મા ॥ ૭૫॥

વિષયેષુ વિહારિ નિર્વિશઙ્કં
હૃદયં મે હૃતવાનલીવ કીટમ્ ।

વિભુરેષ વિદેહરાજકન્યા-
કુચકુમ્ભચ્યુતકુઙ્કુમારુણાઙ્ગઃ ॥ ૭૬॥

અયિ મન્મથ કોપ લોભમોહૌ
મદ માત્સર્ય વૃથાયમુદ્યમો વઃ ।
શરણઙ્કુરુતે યતો મનો મે
શરકૃત્તાશરનાયકં પ્રભું તમ્ ॥ ૭૭॥

પશ્યઙ્ઘ્રિતાપમચિરોજ્ઝિતપઞ્ચબાણ-
વિદ્યાપુનર્ગણનદાયિપદારવિન્દે ।
દેવે મનશ્ચરતિ ચન્દ્રકલાપચાપ-
દ્વૈતોપદેશવિધિદેશિકબાહુદણ્ડે ॥ ૭૮॥

દેવતાન્તરમપાસ્ય જન્મિતાદાવતાન્તજનભુક્તિદાયિનમ્ ।
જાનકીશમવલમ્બતે દયાસ્થાનકીશનિવહં મનો મમ ॥ ૭૯॥

વારિધિસ્મયનિરોધિસાયકે
વાસરાધિપતિવંશનાયકે ।
ભક્તલોકભરણક્ષમાશયે
ભદ્રકાઙ્ઘિ હૃદયં નિવેશયે ॥ ૮૦॥

તિષ્ઠન્સાકમનેકવાનરભટૈસ્તીરેઽમ્બુધેરુત્તરે
દેવશ્ચેતસિ ભાતિ મે કુટિલિતભ્રૂવલ્લિદત્તેક્ષણઃ ।
આગચ્છત્યપગચ્છતિ વ્યતિષજત્યુજ્જૃમ્ભમાણે પત-
ત્યાવિધ્યત્યભિગર્જતિ પ્રતિમુહુઃ કલ્લોલજાલે પુરઃ ॥ ૮૧॥

ઉત્સર્પજ્જલસર્પજાલકમુપાગચ્છદ્ધુલીકચ્છપં
વલ્ગત્કર્કટશઙ્ખસઙ્ઘમુદયત્કુમ્ભીરડિમ્ભોત્કરમ્ ।
ઉદ્ધૂતાણ્ડજષણ્ડમુચ્ચનિનદપ્રારમ્ભમમ્ભોનિધિં
લક્ષીકુર્વતિ વર્વૃતીતિ મમ ધીરક્ષીણસારે પ્રભૌ ॥ ૮૨॥

ગઙ્ગાદિમેન તટિનીગૃહિણીશતેન
સાકં કૃતાઞ્જલિપુટં શરણં વૃણાનમ્ ।
વૈદૂર્યવર્ણતનુમર્ણવમન્વગૃહ્ણા-
દીનૈકબન્ધુરહિમદ્યુતિવંશદીપઃ ॥ ૮૩॥

દ્રાગુન્મૂલિતનીતશૈલશિખરપ્રક્ષેપશીર્ણધ્વન-

ત્કલ્લોલોત્પતદમ્બુશીકરકુલક્લિન્નૈઃ પ્લવઙ્ગવ્રજૈઃ ।
નીરન્ધ્રીકૃતતીરસૈકતતલે નીરાકરે કૌતુક-
ન્યસ્તાક્ષો હૃદિ ભાતિ મે ધૃતધનુર્બાણો રઘૂણાં પ્રભુઃ ॥ ૮૪॥

ખેયામ્ભાંસિ મુખૈઃ પિબામ ચરણૈર્મથ્નામ સાલં ગૃહા-
ન્પ્લોષામ જ્વલનેન વિભ્રમવનાન્યુત્પાટયામૌજસા ।
રક્ષાંસિ પ્રહરામ પાણિભિરિતિ વ્યાહારિભિર્વાનરૈ-
ર્લઙ્કાં રોધયતિ સ્મ રાઘવકુલાલઙ્કારભૂતઃ પ્રભુઃ ॥ ૮૫॥

મા ચેતસ્ત્વરિતં ગમઃ પરિસરે દેવસ્ય યદ્દૂરત-
સ્તૌ સુગ્રીવવિભીષણાવપિ સમં સૌમિત્રિણા તિષ્ઠતઃ ।
હસ્તાગ્રાપિહિતાનનં હનુમતા કર્ણે ગિરં જલ્પતા
દ્વન્દ્વં મન્ત્રયતે પ્લવઙ્ગમચમૂમધ્યસ્થિતોઽયં પ્રભુ- ॥ ૮૬॥

પામરસાર્થદુરાપં તામરસાર્થનપદાક્ષિસૌલભ્યમ્ ।
માનસમુદ્ધતમયતે દીનસમુદ્ધરણદક્ષિણં રામમ્ ॥ ૮૭॥

પાતકરાજિહરાખ્યં શીતકરાજિક્ષમાનનં દેવમ્ ।
કુઞ્જરયાનમુપાસે પિઞ્જરયાનદ્ધકાર્મુકં મૌર્વ્યા ॥ ૮૮॥

સુગ્રીવેણ યવાગ્રશોભિકણિશશ્રેણીપિશાઙ્ગશ્રિયા
કાલોન્મીલિતકર્ણિકારકલિકાગૌરેણ સૌમિત્રિણા ।
સાકં વાનરસૈનિકેષુ નિવસન્સાન્દ્રાનુબદ્ધાતસી-
સચ્છાયઃ કુતુકં કરોતિ હૃદિ મે સાકેતપૃથ્વીપતિઃ ॥ ૮૯॥

સન્નહ્યદ્ભટકોટિકૌણપપુરીસન્દર્શને કૌતુકા-
દારૂઢેન સુવેલશૈલશિખરં શ્યામામ્બુવાહશ્રિયા ।
ચાપં વાસવચાપચારુ દધતા શાખામૃગાનીકિની-
સમ્બાધાન્તિકભૂમિના હૃતમિવ સ્વાન્તં મમ સ્વામિના ॥ ૯૦॥

આરૂઢભ્રુકુટીવિટઙ્કનિટિલામારક્તનેત્રામ્બુજાં
ગાઢોન્નદ્ધજટાભરાં કપિચમૂકલ્યાણદાનોન્મુખીમ્ ।
બાણાનુત્સૃજતીં રણે નિશિચરપ્રાણાપહારક્ષમાં
લીલાં કામપિ ચિન્તયામિ મનસા નીલામ્બુદશ્યામલામ્ ॥ ૯૧॥

પ્રસર્પદનુપપ્લવપ્લવગસૈનિકપ્રેક્ષણ-
ક્ષણપ્રહૃતનૈરૃતદ્રુતગૃહીતધૂતાયુધે ।

રણે પટુરણદ્ગુણપ્રહિતબાણબાણાસન-
પ્રસન્નકરપુષ્કરે રઘુવરે વિરૂઢં મનઃ ॥ ૯૨॥

બાણચ્છિન્નવિકીર્ણરાવણશિરઃ શ્રેણીભુરીણીકૃતે
ઘોરે સઙ્ગરચત્વરે ક્રતુભુજાં યઃ પ્રીતયે તત્ત્વરે ।
તસ્યાતસ્યસિતશ્રિયઃ શ્રિતજનશ્રેયસ્કૃતો ધન્વિનઃ
સ્મારં સ્મારમયે ક્ષિપેમ સમયે દુર્વારસર્વાપદઃ ॥ ૯૩॥

નારાચેન સમં નિશાચરચમૂવારાશિકુમ્ભીભુવા
પ્રાવૃણ્મેઘમુહૂર્તલાઞ્છનધનુઽ પુણ્યં દધાનો ધનુઃ ।
લઙ્કાતઙ્કનિદાનવાનરભટવ્રાતાનપેતાન્તિકો
વીરઃ કોઽપિ વિકર્ષતીવ હૃદયં વિષ્વક્પ્રચારપ્રિયમ્ ॥ ૯૪॥

સાલગ્રામ ઇવાર્કમણ્ડલ ઇવ ક્ષીરામ્બુરાશાવિવ
શ્રીવૈકુણ્ઠ ઇવાગમાઞ્ચલ ઇવ પ્રાચેતસોક્તાવિવ ।
નિર્વ્યાજેન કૃપાભરેણ નિતરાં નિર્ધૂય મોહાંહસી
કાઙ્ક્ષત્યેષ કકુત્સ્થવંશતિલકઃ કર્તું પદં મે હૃદિ ॥ ૯૫॥

નિહતવતિ કબન્ધં નીરધૌ સેતુબન્ધં
વિહિતવતિ વિચિત્રં વીક્ષકાણાં પવિત્રમ્ ।
જગદુપકૃતિનિષ્ઠે જ્યાકિણાઙ્કપ્રકોષ્ઠે
મમ હૃદયમુદારે મજ્જતિ ક્વાપિ વીરે ॥ ૯૯॥

શરસ્ફુરદુષર્બુધક્વથિતજૃમ્ભદમ્ભોવહ-
દ્બૃહત્તરતરઙ્ગસઙ્કુલિતકૂલશૈલોદરે ।
ઉદન્વતિ વિતન્વતિ સ્તુતિમવક્રિમપ્રક્રમઃ
ક્રમેત હૃદિ મે તરણ્યભિજનપ્રદીપઃ પ્રભુઃ ॥ ૯૭॥

જગત્ત્રયપવિત્રયા જનિતચિત્રચારિત્રયા
મહીભવકલત્રયા મહિતભાનુમત્પુત્રયા ।
દયારુચિરશીલયા દમિતતાડકાબાલયા
કયાપિ ઘનનીલયા કવચિતં મનો લીલયા ॥ ૯૮॥

નિરર્ગલધનુર્ગુણપ્રહિતનિર્ગલન્માર્ગણ-
પ્રપઞ્ચહતવઞ્ચનાસમરચુઞ્ચુનક્તઞ્ચરમ્ ।
ચિરન્નમુનિરત્નનત્યુચિતયત્નમાત્મા મમ
સ્મરત્યયમનત્યયં પ્રભુમદિત્યપત્યાન્વયમ્ ॥ ૯૯॥

બિભ્રત્પ્રત્યવપન્નસર્વભુવનશ્વઃશ્રેયસશ્રીપુનઃ
પ્રત્યુત્થાપનવિભ્રમૈકરસિકૌ પાપયોર્ધનુઃસાયકૌ ।
સ્થાન્યાદેશપદાધિરોપિતદશગ્રીવેદમેકાન્તર-
ભ્રાતૃવ્યઞ્જિતશક્તિરસ્તુ હૃદિ મે વીરાગ્રણી રાઘવઃ ॥ ૧૦૦॥

સમીકભુવિ ચણ્ડયા સરણધૂતવેતણ્ડયા
ભુજાવિજિતશુણ્ડયા ભુજગભીમકોદણ્ડયા ।
પ્રતિદ્વિષમકુણ્ઠયા પ્રથમવાસવૈકુણ્ઠયા
પ્રવિદ્ધદશકણ્ઠયા પ્રસૃતમન્તરુત્કણ્ઠયા ॥ ૧૦૧॥

પ્રભૂતગુણભૂષણા પ્રબલરક્ષસાં ભીષણા
પ્રમોદિતવિભીષણા પ્રદરજાબ્ધિસંશોષણા ।
મખાશિષુ કૃતાવના મહદમુક્તસંસેવના
મહીદુહિતૃસેવના મનસિ ભાતિ મે ભાવના ॥ ૧૦૨॥

દયારસધુરીણયા દમિષુ દત્તકલ્યાણયા
દરીસદૃશતૂણયા દલિતરાવણપ્રાણયા ।
મલીમસવિદૂરયા મનુકુલોદિતાકારયા
મનઃ સુકૃતધારયા મમ હૃતં મહોદારયા ॥ ૧૦૩॥

કૃચ્છ્રાદન્તઃસુરપરિષદઃ પ્રાપ્ય માર્ગં પ્રવિશ્ય
બ્રહ્મર્ષીણાં ગણમથ ચલત્પીશસમ્બાધખિન્નમ્ ।
રાજન્યે મે લગતિ હૃદયં કાપિ પૃથ્વીકુમારી-
પીનોત્તુઙ્ગસ્તનમકરિકાલેખવિદ્યાધુરીણે ॥ ૧૦૪॥

નિઃશબ્દસ્તિમિતપ્લવઙ્ગમભટશ્રેણ્યન્તરાલસ્થલી-
વિક્રાન્તાઙ્ગદહૂતદર્શિતવિભુક્તૈકૈકદિક્પાલકામ્ ।
આસ્થાનીમવલોકિતસ્મિતશિરઃ કમ્પાદિસંવાહનાં
સન્તુષ્યત્સકલામરાં રઘુપતેરન્તશ્ચિરં ચિન્તયે ॥ ૧૦૫॥

ઇતિ શ્રીરામભદ્રદીક્ષિતકૃતં રામકર્ણરસાયનં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran psaeaswaran@gmail.com

*rAmakarNarasAyanam*

pdf was typeset on December 17, 2022

Please send corrections to *sanskrit@cheerful.com*